It seems clear from the account given in this book and several inscriptions of the time that *Lavaṇaprasâda* and *Vîradhavala*, though they had cast *Bhîmadeva* into shade, had not yet formally assumed the title of the kings of *Paṭṭaṇa*.* As is often the case among the Hindus, those who actually attain high power by the strength of their arm rather take a pride in keeping formally their former status, and rendering cheerfully, or even boastfully, submission to the hereditary monarch, who has it no longer in his power to compel it by force. It may well be illustrated by the attitude of the First Maratha conquerors towards the Emperor of *Delhi*, and that of the *Peishwas* towards the *Mahârâjâs* of *Sattara*. The *Peishwa* held a grand *Durbar* at *Poona* for the assumption of the title which *Sindia* had obtained for him from the fallen emperor of *Delhi*, and no *Peishwa* ever assumed authority without going through the form of obtaining the robes of state from *Sattara*. However, those who succeed these great men by right of birth have not got for their satisfaction the true glory of personal achievements, and they become impatient of the acknowledgment of fictitious subordination. By this time the old dynasty also has generally lost its hold on the affections of the people; and a public assumption of sovereign power by the new line does not give much offence to any one. Thus, it would appear that *Visaladeva* put his foot on the step from which *Lavaṇaprasâda* and *Vîradhavala* kept themselves back half out of chivalry and half out of policy. In the grant of *Visaladeva*, the title *Mahârâjâdhirâja* is applied to him,

* One of the *Prabandhas* says that Vastupâla proposed to *Vîradhavala* that he should assume the title of Mahâraja; but *Vîradhavala* did not approve of it. He said he was contented with his title of *Râṇaka*.

Digitized by Google

though up to his time the kings of the house of *Paṭṭaṇa* alone were considered as entitled to it. The last mention I have found of the king of *Paṭṭaṇa* is in connection with *Lavaṇaprasâda's* having asked for money in a friendly manner from *Bhîmadeva*. There is no mention anywhere of any actual hostility between the house of *Dholka* and *Paṭṭaṇa*. *Bhîmadeva*, though personally valiant, seems to have allowed himself quietly to be superseded by his ambitious kinsmen, first in actual power and then in rank.

VI.

In concluding this introduction, it remains for me to acknowledge that the publication of this book is entirely due to Doctor G. Bühler. He lent me two manuscripts, one, *A*, a copy of some old manuscript made for him, and another, *B*, which he had borrowed from Mr. Javerilâl Umiaśankara. He also handed over to me a portion of the poem copied out by him for the press, and obtained the permission of the Director of Public Instruction for the inclusion of this publication in the Bombay Sanskrit Series. Besides, I am indebted to him for pointing out most of the sources of information which I have embodied in these pages. In fact, but for him I should not have been able to do the little I have done. For the third manuscript I got later on, I am indebted to Mr. Vrajalal Shastri, of the Gujarat Vernacular Society. All the three manuscripts seem to be copies of the same original manuscript, the differences they show being generally due to the varying intelligence or rather ignorance of the copyists.

GUJERAT COLLEGE,
21st September 1883. } A. V. K.

Digitized by Google

UNIV. OF
CALIFORNIA

कीर्तिकौमुदी।

श्रिये सन्तु सतामेते चिरं चातुर्भुजा भुजाः।
यामिका इव धर्मस्य चत्वारः स्फुरदायुधाः ॥ १ ॥
कुर्वन्गिरिभुवि क्रीडां दृष्टोन्नतपयोधरः।
उल्लसच्चन्द्रकः प्रीतिं नीलकण्ठः करोतु वः ॥ २ ॥
जटासीमन्तकान्तं वः श्रियेस्तु शिवयोर्वपुः।
तातेत्यम्बेति वा हूतं गुहेन प्रतिवक्ति यत् ॥ ३ ॥
भूयान्मुदे तदेकं वः शिवकेशवयोर्वपुः।
करोति प्रणतिं यस्य भीतः प्रीतश्च मन्मथः ॥ ४ ॥
सारस्वतमयं वन्दे तमोपहमहं महः।
अपि सूक्ष्मपदार्थानां साक्षात्कारं करोति यत् ॥ ५ ॥
सरस्वतीं सदा वन्दे यदुपास्तिं समुच्छ्रिताः।
काव्यानि कुसुमानीव सुवते कविपादपाः ॥ ६ ॥
वन्द्यास्ते कवयो येषां सूक्तिसौरभवासिता।
कृतत्रिजगदाह्लादं कीर्तिर्भ्रमति भूभुजाम् ॥ ७ ॥
जयन्ति कवयः केपि सूक्तैर्मन्त्रैरिव द्रुतम्।
तांस्तांश्चिद्रूपचित्तेषु रसानावेशयन्ति ये ॥ ८ ॥
मधुना लसदुत्कर्षां कविषट्पदपद्मिनीम्।
रामायणकवेस्तस्य हृद्यां वन्दे सरस्वतीम् ॥ ९ ॥
स्तुमस्तमेव वाल्मीकिं यत्प्रसादात्प्रशस्यते।
लोकैर्दाशरथं वृत्तमपि श्रवणदुःखकृत् ॥ १० ॥

Digitized by Google

स नमस्यः कथं न स्यात्सतां सत्यवतीसुतः ।
सुपर्वोपचितं चक्रे यः स्वर्गमिव भारतम् ॥ ११ ॥

कालिदासः कविर्जातः श्रीरामचरितस्य यत् ।
स एष शर्करायोगः पयसः समपद्यत ॥ १२ ॥

विरक्तश्चेद्बुरुक्तिभ्यो निर्वृतिं वाथ वाञ्छसि ।
वयस्य कथ्यते तथ्यं माघसेवां कुरुष्व तत् ॥ १३ ॥

जनितार्जुनतेजस्कं तमीश्वरमुपाश्रिता ।
राकेव भारवेर्भाति कृतिः कुवलयप्रिया ॥ १४ ॥

युक्तं कादम्बरीं श्रुत्वा कवयो मौनमाश्रिताः ।
बाणध्वनावनध्यायो भवतीति स्मृतिर्यतः ॥ १५ ॥

वचनं धनपालस्य चन्दनं मलयस्य च ।
सरसं हृदि विन्यस्य कोभून्नाम न निर्वृतः ॥ १६ ॥

बिल्हणस्य कवेः प्राप्तप्रसादेव सरस्वती ।
नीयते जातु कालुष्यं दुर्जनैर्न घनैरपि[1] ॥ १७ ॥

सदा हृदि वहेम श्रीहेमसूरेः सरस्वतीम् ।
सुवत्या शब्दरत्नानि ताम्रपर्णी जिता यया ॥ १८ ॥

स्तुमः सुमनसां श्रेष्ठं नीलकण्ठमहर्निशम् ।
दर्पकोपचितं यस्य सर्वज्ञस्य न मानसम् ॥ १९ ॥

श्रीप्रह्लादनदेवोभूद्भ्रितयेन प्रसिद्धिमान् ।
पुत्रत्वेन सरस्वत्याः पतित्वेन जयश्रियः ॥ २० ॥

श्रीभोजमुञ्जदुःखार्तां रम्यां वर्तयता कथाम् ।
प्रह्लादनेन साह्लादा पुनश्चक्रे सरस्वती ॥ २१ ॥

---

[1] C notes marginally the reading न वर्षासु घनैरपि.

Digitized by Google

कवीन्द्रश्च मुनीन्द्रश्च नरचन्द्रो जयत्ययम् ।
प्रशस्तिर्यस्य काव्येषु संक्रान्ता हृदयादिव[2] ॥ २२ ॥
मुनेर्विजयसिंहस्य[3] सुधामधुरया गिरा ।
भारतीमञ्जुमञ्जीरस्वरोपि परुषीकृतः ॥ २३ ॥
सुभटेन पदन्यासः स कोपि समितौ कृतः ।
येनाधुनापि धीराणां रोमाञ्चो नापचीयते ॥ २४ ॥
स्ववाक्पाकेन यो वाचां पाकं शास्त्यपरान्कवीन् ।
स्वयं हरिहरः सोभूत्कवीनां पाकशासनः ॥ २५ ॥
न माघः श्राव्यते कैश्चिन्नाभिनन्दोभिनन्द्यते ।
निष्कलः कालिदासोपि यशोवीरस्य संनिधौ ॥ २६ ॥
प्रकाश्यते सदा साक्षाद्यशोवीरेण मन्त्रिणा ।
मुखे दन्तद्युता ब्राह्मी करे श्रीः स्वर्णमुद्रया ॥ २७ ॥
अर्जितास्ते गुणास्तेन चाहमानेन्द्रमन्त्रिणा[4] ।
विधेरब्धेश्च नन्दिन्यौ यैरनेन नियन्त्रिते ॥ २८ ॥
वस्तुपालयशोवीरौ सत्यं वाग्देवतासुतौ ।
एको दासस्वभावोभूदुभयोरन्यथा कथम् ॥ २९ ॥
हृदापदः परित्यक्ता निर्व्याला मलयद्रुमाः ।
अमालिन्यकृतो दीपाः श्रीपात्रं सन्तु साधवः ॥ ३० ॥
साधूनां लुब्धता काचिदचिन्त्यैव तथा हि ये ।
परेषामेव गृह्णन्ति गुणान्भूरिगुणा अपि ॥ ३१ ॥
रमयन्ति न कं नाम सन्तश्छायाद्रुमा इव ।
पुष्यन्ति स्मितपुष्पं ये सूचितोच्चैःफलोदयम् ॥ ३२ ॥

---

[2] हृदयामिव A, B, C. [3] विजयसेनस्य C.
[4] वाहमाने° A, चापमाने° B, C. C marginally notes वाहमानेन्द्रभर्तृणा.

Digitized by Google

अमृतैर्मानसं मन्ये संपूर्णं सततं सताम् ।
स्यन्देनेव[5] तदीयेन वाचो मुञ्चन्ति नार्द्रताम् ॥ ३३ ॥
अश्रुप्रवर्तकैर्धूमैरिव किं तैरसाधुभिः ।
रसवत्यां कवेरुक्तौ मालिन्यं जनयन्ति ये ॥ ३४ ॥
वृश्चिकानां भुजंगानां दुर्जनानां च वेधसा ।
विभज्य नियतं न्यस्तं विषं पुच्छे मुखे हृदि ॥ ३५ ॥
अस्मिन्कलौ खलोत्सृष्टदुष्टवाग्बाणदारुणे ।
कथं जीवेज्जगन्न स्युः संनाहाः सज्जना यदि ॥ ३६ ॥
निदानं नात्र पश्यामि यदुपेत्यापि दुर्जनाः ।
आक्रोशन्ति भृशं साधूनध्वगानिव कुक्कुराः ॥ ३७ ॥
दोषज्ञैस्तेन राज्ञेव सहसाधनरासभा ।
त्याज्यावकरभूमीव सहसा घनरासभा[6] ॥ ३८ ॥
दुर्जनैस्तर्ज्यमानस्य साधोरधिकमेधते ।
भस्मभिर्मृज्यमानस्य मुकुरस्येव चारुता ॥ ३९ ॥
आस्तां तावत्कृतक्रोधः सप्रमोदोपि[7] दुर्जनः ।
कष्टाय जायते दृष्टो रतवानिव वायसः ॥ ४० ॥
दुर्जनानां द्विजिह्वत्वख्यातिरेषा मृषैव यत्[8] ।
विश्वोपतापिनां तेषामुचिता सप्तजिह्वता ॥ ४१ ॥
अस्मिन्नसमयारण्ये खलवेतालसंकुले ।
चरतः सज्जनालापाः[9] शिखाबन्धीभवन्तु मे ॥ ४२ ॥
सोस्ति कश्चन यो दृष्टोप्यशुद्धानां विशुद्धये ।
तेपि तिष्ठन्ति ये दृष्टाः शुद्धानामप्यशुद्धये ॥ ४३ ॥

---

[5] स्पन्देनेव A, B.
[6] °सभाः A, B, C.
[7] संप्रमोदो° A, B.
[8] यत् A.
[9] °लापा A, B.

Digitized by Google

कुलमुज्ज्वलमाकारं चारुमाचारमुत्तमम् ।
दानं संमानसंपन्नमुन्नतिं[10] नमिताहिताम् ॥ ४४ ॥
प्रज्ञामाङ्गिरसावज्ञां दयां भग्नभयोदयाम् ।
श्लोकं भूषितभूर्लोकं मन्त्रितां न्याययन्त्रिताम् ॥ ४५ ॥
विलोक्य वस्तुपालस्य भक्तिं चात्मनि निर्भराम् ।
श्रीसोमेश्वरदेवेन तत्स्वरूपं निरूप्यते ॥ ४६ ॥ त्रिभिःकुलकम् ॥
मन्त्रीशगुणमाणिक्यश्रेणिलाभमहोत्सवे ।
श्रीसोमेश्वरदेवस्य गातुमुत्ताम्यतीव गीः ॥ ४७ ॥
अस्ति हस्तिमदक्लेदविराजद्गोपुरं पुरम् ।
अणहिल्लपुरं नाम धाम श्रेयः श्रियामिह ॥ ४८ ॥
कृतहारानुकारेण प्राकारेण चकास्ति यत् ।
सुकृतेन वृतीभूय[11] त्रायमाणं कलेरिव ॥ ४९ ॥
अनेकानोकहच्छन्ना प्रत्यासन्ना वनावलिः ।
यत्रोन्नतस्य वप्रस्य च्छायेव प्रतिभासते ॥ ५० ॥
चन्द्रशालासु बालानां खेलन्तीनां निशामुखे ।
यत्र वक्त्रश्रिया भाति शतचन्द्रं नभस्तलम् ॥ ५१ ॥
कुत्रापि श्रुतिनिर्घोषैः क्वचिन्मङ्गलगीतिभिः ।
बन्दिकोलाहलैः क्वापि यत्सदा मुखरं पुरम् ॥ ५२ ॥
धौतेव सुधया यत्र तुषारेणेव भूषिता ।
रचिता रजतेनैव राजते सौधपङ्क्तिः ॥ ५३ ॥
दत्तचित्तप्रसादेषु प्रासादेषु सदा वसन् ।
यत्र शम्भुर्न कैलासविलासमभिलष्यति ॥ ५४ ॥

---

[10] सन्मान C. [11] व्रतीभूय C.

Digitized by Google

यस्मिन्होमानलोद्भूतधूमधोरणिरुद्यता ।
विभाति भानुकन्येव स्वर्गङ्गासंगमोन्मुखी ॥ ५५ ॥
यत्र सौधांशुविध्वस्तसमस्ततिमिरे पुरे ।
न स्वैरिणीसपक्षस्य पक्षस्य भवति क्षणः ॥ ५६ ॥
लङ्का शङ्कावती चम्पा सकम्पा विदिशा कृशा ।
काशिर्नाशितसंपत्तिर्मिथिला शिथिलादरा ॥ ५७ ॥
त्रिपुरी विपरीतश्रीर्मथुरा मन्थराकृतिः ।
धारापभून्निराधारा यत्र जैत्रगुणे सति ॥ ५८॥ युग्मम् ॥
पुरान्तराणि निर्जित्य जेतुं पौरन्दरं पुरम् ।
पत्त्रालम्बं करोतीव यत्प्रासादध्वजांशुकैः[12] ॥ ५९ ॥
यमुनेव मधूपघ्नं साकेतं सरयूरिव ।
गजाह्वयं च गङ्गेव सेवते यत्सरस्वती ॥ ६० ॥
भान्ति देवालया यस्मिन्हिमालयसमश्रियः ।
भूतलं व्याप्य भूतानां कीर्तिकूटा इवोद्गताः ॥ ६१ ॥
जातशैत्यश्चलच्चैत्यपताकापवनैः क्षणम् ।
अरुणस्तरुणेनापि यत्र पूष्णा न पीड्यते ॥ ६२ ॥
यत्र नारीमनश्चौरान्पौरान्सौराज्यराजिते ।
निगृह्णन्निषुभिः पौष्पैर्द्वैराज्यं कुरुते स्मरः ॥६३ ॥
कौरवेश्वरसैन्यस्य यत्पौरस्त्रीजनस्य च ।
बलगाङ्गेयकर्णस्य[13] न पश्याम्यहमन्तरम् ॥ ६४ ॥
यस्य राजपथे पांसुः सिक्तः कुम्भिमदाम्बुभिः ।
ऊर्ध्वमभ्युद्गतोप्येति[14] न रङ्गद्भिस्तुरंगमैः ॥ ६५ ॥

---

[12] प्रसाद° A, B.
[13] बलागाङ्गेय° A, B.
[14] ऊर्द्धमभ्युद्गतो° A; ऊर्द्धमभ्युन्नतो—परंगद्भि° B.

Digitized by Google

गृहीतभूरिदण्डानां विडम्बितमहीभुजाम् ।
यत्रत्यानां नरेन्द्राणां प्रासादानां च नान्तरम् ॥ ६६ ॥
भाति यत्र कपोलान्तःसंक्रान्तेन्दुर्वधूजनः ।
राजमुद्राङ्कितः कोशः कन्दर्पनृपतेरिव ॥ ६७ ॥
यत्र यत्र प्रसर्पन्ति सलीलं यन्मृगीदृशः ।
दासीव दृष्टिरन्वेति तत्र तत्र विलासिनाम् ॥ ६८ ॥
वीक्षिता वलितग्रीवं तन्वीभिर्यत्र केपि यत् ।
मन्ये व्यावर्तिताङ्गेन तेनङ्गेनापि ताडिताः ॥ ६९ ॥
रूपेणाप्रतिमाः कान्ता यत्र धात्रा कृताः किल ।
तथापि प्रतिमास्तासां संजाता रत्नभित्तिषु ॥ ७० ॥
ज्ञात्वा सरसि सौरभ्यं लीलोद्यानादुपाहरन्[15] ।
तमीसमीरणः स्त्रैणं यत्र कामीव सेवते ॥ ७१ ॥
यस्मिन्सरो हरोपेन्द्रप्रासादैः परितश्चितम् ।
अमुक्तमौक्तिकं भूमेर्भात्येकमिव कुण्डलम् ॥ ७२ ॥
आभाति यस्य गम्भीरं सरः स्मेरैः सरोरुहैः ।
खेलन्तीनां मुखं तोयदेवतानां मुखैरिव ॥ ७३ ॥
यस्यान्तर्गिरिशागारदीपिकाः प्रतिबिम्बिताः ।
शोभन्ते निशि पातालव्यालमौलिमणिश्रियः ॥ ७४ ॥
यस्योच्चैः सरसस्तीरे राजते रजतोज्ज्वलः ।
कीर्तिस्तम्भो नभोगङ्गाप्रवाहोवतरन्निव ॥ ७५ ॥
हरप्रासादसंदोहमनोहरमिदं[16] सरः ।
राजते नगरं तच्च राजहंसैरलंकृतम् ॥ ७६ ॥

---

[15] °उपाहरत् A, C; °उपाहरेत् B. [16] हरप्रसाद° B, C.

Digitized by Google

सशङ्खचक्रग्रथितः प्रभूतावतारशाली कमलाभिरामः ।
स एष कासारशिरोवतंसः कंसग्रहर्तुः प्रतिमां बिभर्ति ॥ ७७ ॥
न मानसे मेद्यति मानसं मे पम्पा न संपादयति प्रमोदम् ।
अच्छोदमच्छोदकमप्यसारं सरोवरे राजति सिद्धभर्तुः ॥ ७८ ॥
प्रतितटघटितोर्मिघातजातप्रसृमरफेनकदम्बकच्छलेन[17] ।
हरिहरहसितद्युतिं स्वकीर्तिं दिशि दिशि कन्दलयत्ययं तडागः ॥७९॥
अलघुलहरिलिप्तव्योमभागे तडागे
तरलतुहिनपिण्डापाण्डुडिण्डीरदम्भात् ।
तरुणतरणितापव्यापदापन्नमुच्चै-
रिह विहरति ताराचक्रवालं विशालम् ॥ ८० ॥
एकत्र स्फुटदब्जराजिरजसा बभ्रूकृतः सुभ्रुवां
प्रभ्रश्यत्कुचकुम्भकुङ्कुमरसैरन्यत्र रक्तीकृतः ।
अन्यत्र स्मितनीलनीरजदलच्छायेन नीलीकृतः
श्रेयः सिन्धुरवर्णकम्बलधुरं धत्ते सरःशेखरः ॥ ८१ ॥

॥ इति श्रीगूर्जरेश्वरपुरोहितश्रीसोमेश्वरदेवविरचिते कीर्तिकौमुदीनाम्नि महाकाव्ये नगरवर्णनो नाम प्रथमः सर्गः ॥

---

[17] प्रसृमरकेन A, B.

Digitized by Google

॥ नरेन्द्रवंशवर्णनम् ॥

अथ चौलुक्यभूपालः पालयामास तत्पुरम् ।
जितराजसमाजः[1] श्रीमूलराज इति श्रुतः ॥ १ ॥
आवर्जिता जितारातेर्गुणैर्बाणरिपोरिव ।
गूर्जरेश्वरराज्यश्रीर्यस्य जज्ञे स्वयंवरा ॥ २ ॥
लाटेश्वरस्य सेनान्यमसामान्यपराक्रमः ।
दुर्वारं बारपं हत्वा हास्तिकं यः समग्रहीत् ॥ ३ ॥
सपत्नाकृतशत्रूणां संपराये स्वपक्षिणाम् ।
महेच्छकच्छभूपालं[2] लक्षं लक्षीचकार यः ॥ ४ ॥
दानोपहतदारिद्र्यं[3] शौर्यनिर्जितदुर्जनम् ।
कीर्तिस्थगितकाकुत्स्थं[4] यो राज्यमकरोच्चिरम् ॥ ५ ॥
तस्मिन्नथ कथाशेषे निःशेषितनिजद्विषि ।
राजा चामुण्डराजोभून्महीमण्डलमण्डनम् ॥ ६ ॥
विरोधिवनिताचित्ततापाध्यापनपण्डिताः[5] ।
यदीयाः कटकारम्भाः[6] कृतजम्भारिभीतयः ॥ ७ ॥
पाणिपङ्कजवर्तिन्या स्फुरत्कोशविलासया ।
यस्यासिभ्रमरश्रेण्या भिन्ना वंशाः क्षमाभृताम् ॥ ८ ॥
लोकत्रयोल्लसत्कीर्तिर्महीपतिमतल्लिका ।
राजा वल्लभराजाख्यस्ततस्तत्तनुभूरभूत् ॥ ९ ॥
संभूतकम्पसंपत्तेर्यदातङ्केन केनचित् ।
जगाल मालवेशस्य करवालः करादपि ॥ १० ॥

---

[1] समाज A, B. [2] °महेच्छः C. [3] शनोपहत° C.
[4] काकुस्थं B. [5] °मण्डिताः A. [6] कटकारम्भा A, B.

Digitized by Google

उपरुन्धन्विरुद्धानां पुरीं पुरुषपौरुषः ।
जगत्कम्पन इत्येष विशेषज्ञैरुदीरितः ॥ ११ ॥

बभूव भूपतिस्तस्यावरजो विरजस्तमाः ।
श्रीमान्दुर्लभराजाख्यः सुदुर्लभयशाः परैः ॥ १२ ॥

कालेन करवालेन भोगिनेवाभिरक्षितम् ।
निधानमिव यद्राज्यमनाहार्यं परैरभूत् ॥ १३ ॥

सर्वथानुपभोग्येषु यस्य सौभाग्यभासिनः ।
न करः परदारेषु द्विजसारेषु चापतत् ॥ १४ ॥

तस्य भ्रातृसुतः श्रीमान्भीमाख्यः पृथिवीपतिः ।
विष्टपत्रितयाभीष्टप्रवृत्तिप्रतिभूरभूत् ॥ १५ ॥

मण्डलाग्रेण यः शौर्यशालिना विस्मृतास्मितम् ।
चकार भोजमम्भोजमिव पीयूषदीधितिः ॥ १६ ॥

एकधारापतिर्यस्य द्विधारेणासिना जितः ।
किं चित्रं यदसौ जेतुं शतधारमपि क्षमः ॥ १७ ॥

असौ गुणीति मत्वेव भोजः कण्ठमुपेयुषा ।
धनुषा गुणिना यस्य नश्यन्नश्वान्न पातितः ॥ १८ ॥

सुपर्णकेतनाभ्यर्णं तत्र क्षत्रपतौ गते ।
धात्रीं धात्रीप्रपौत्रीं[7] च श्रीकर्णः सार्णवां दधे ॥ १९ ॥

गुरुणा विक्रमेणायं बभूव पितृसंनिभः ।
आकारेण तु रम्येण भूपोभूदात्मभूसदृक् ॥ २० ॥

विना कर्णेन तेन स्त्रीनेत्राणां न रतिः क्वचित् ।
इतीव जज्ञिरे तेषामनुकर्णं प्रवृत्तयः ॥ २१ ॥

---

[7] धात्रीं धात्रीव तत्पुत्रः श्री° A. C suggests धात्रीं पौत्रीव तत्पुत्रः.

Digitized by Google

तत्कर्णार्जुनयोर्वैरं पूर्वं कर्णः स्मरन्निव ।
अर्जुनं गमयामास यशो देशान्तराणि यः ॥ २२ ॥
अभिरामगुणग्रामो रामो दशरथादिव ।
सूनुः श्रीजयसिंहोस्माज्जायते स्म जगज्जयी ॥ २३ ॥
शिशुनापि शुनासीरवीरवृत्तिमतीयुषा ।
रुषा भुजिष्यतां नीताः पिशुना येन भूभुजः ॥ २४ ॥
अपारपौरुषोद्गारं खड्गारं गुरुमत्सरः ।
सौराष्ट्रं पिष्टवानाजौ करिणं केसरीव यः ॥ २५ ॥
असंख्यहरिसैन्येन प्रक्षिप्तानेकभूभृता ।
बद्धः सिन्धुपतिर्येन वैदेहीदयितेन वा ॥ २६ ॥
अमर्षणं मनः कुर्वन्विपक्षोर्वीभृदुन्नतौ ।
अगस्त्य इव यस्तूर्णमर्णोराजमशोषयत् ॥ २७ ॥
गृहीता दुहिता तूर्णमर्णोराजस्य विष्णुना ।
दत्तानेन पुनस्तस्मै भेदोभूदुभयोरयम् ॥ २८ ॥
द्विषां शीर्षाणि लूनानि[8] दृष्ट्वा तत्पादयोः पुरः ।
चक्रे शाकंभरीशोपि शङ्कितः प्रणतं शिरः ॥ २९ ॥
मालवस्वामिनः प्रौढलक्ष्मीपरिवृढः स्वयम् ।
समित्यपरमारो यः परमारानमारयत् ॥ ३० ॥
क्षिप्त्वा धारापतिं राजशुकवत्काष्ठपञ्जरे ।
यः काष्ठापञ्जरे कीर्तिराजहंसीं न्यवीविशत् ॥ ३१ ॥
एकैव जगृहे धारा नगरी नरवर्मणः ।
दत्ता येनाभुधारास्तु तद्वधूनां सहस्रधा ॥ ३२ ॥

---

[8] लूनाति A, B.

Digitized by Google

धाराध्वंसप्रसङ्गेन यस्य सांनिध्यशङ्कितः[9] ।
प्राघूर्णकमिषाद्दण्डं महोबकपतिर्ददौ ॥ ३३[10] ॥
सुधेव वसुधा लब्धुं वाञ्छिता येन विद्विषा ।
यस्योल्लसदसिर्बाहू राहूचक्रे तमाहवे ॥ ३४ ॥
जनेन मेने यः स्वामी कुमार इव शक्तिमान् ।
ताम्रचूडध्वजः सोभूत्किंतु केकिध्वजः परः ॥ ३५ ॥
येन विश्वैकवीरेण न स राजा जितो न यः ।
काष्ठा कापि न सा यस्य यशोभिः शोभिता न या ॥ ३६ ॥
गणेशस्येव यस्याग्रपुष्करस्य वृषस्थितेः ।
आज्यसारः करस्थोभूद्गौडो मोदकवत्नृपः ॥ ३७ ॥
श्मशाने यातुधानेन्द्रं बद्ध्वा बर्बरकाभिधम् ।
सिद्धराजेति राजेन्दुर्यो जज्ञे राजराजिषु ॥ ३८ ॥
रजोभिः समरोद्भूतैर्यत्पुरा मलिनीकृतम् ।
तत्पश्चात्कीर्तिकल्लोलैर्येन क्षालितमम्बरम् ॥ ३९ ॥
महीमण्डलमार्तण्डे तत्र लोकान्तरं गते ।
श्रीमान्कुमारपालोथ राजा रञ्जितवान्प्रजाः ॥ ४० ॥
पृथुप्रभृतिभिः पूर्वैर्गच्छद्भिः पार्थिवैर्दिवम् ।
स्वकीयगुणरत्नानां यत्र न्यास इवार्पितः ॥ ४१ ॥

---

[9] यस्य सान्निस्यशङ्कितः A, B.

[10] [महोबकपुराधीशाज्जिताम्मदनवर्मणः ।
कोटीः षण्णवतीर्हेम्नो यस्तन्मानमिवाददे] ॥

This verse does not occur in A. In B it stands on the margin. Its authority is doubtful. B reads मदनवर्मणः and हैंचां. C also gives it marginally; neither of the MSS. numbers it, the verse following it being marked 34 by both.

Digitized by Google

न केवलं महीपालाः सायकैः समराङ्गणे ।
गुणैर्लोकंपृणैर्येन निर्जिताः पूर्वजा अपि ॥ ४२ ॥
वीतरागरतेर्यस्य मृतवित्तानि मुञ्चतः ।
देवस्येव नृदेवस्य युक्ताभूदमृतार्थिता ॥ ४३ ॥
करवालजलैः स्नातां वीराणामेव योग्रहीत् ।
धौतां बाष्पाम्बुधाराभिर्निर्वीराणां न तु श्रियम् ॥ ४४ ॥
शूराणां संमुखान्येव पदानि समरे ददौ ।
यः पुनस्तत्कलत्रेषु मुखं चक्रे पराङ्मुखम् ॥ ४५ ॥
हृदिप्रविष्टयद्बाणक्लिष्टेनाघूर्णितं शिरः ।
जाङ्गलक्षोणिपालेन व्याचक्षाणैः परैरपि ॥ ४६ ॥
चूडारत्नप्रभाकम्रं नम्रं गर्वादकुर्वतः ।
कणशः कुङ्कुणेशस्य[11] यश्चकार शरैः शिरः ॥ ४७ ॥
रागाङ्कूपालबल्लालमल्लिकार्जुनयोर्मृधे ।
गृहीतौ येन मूर्धानौ स्तनाविव जयश्रियः ॥ ४८ ॥
दक्षिणक्षितिपं जित्वा यो जग्राह द्विपद्वयम् ।
तद्यशोभिः करिष्यामो विश्वं नश्यद्विपद्वयम् ॥ ४९ ॥
विहारं कुर्वता वैरिवनिताकुचमण्डलम् ।
महीमण्डलमुद्दण्डविहारं येन निर्ममे ॥ ५० ॥
पादलप्तैर्महीपालैः पशुभिश्च तृणाननैः ।
यः प्रार्थित इवात्यर्थमहिंसाव्रतमग्रहीत् ॥ ५१ ॥
भूपालो जयपालोभूत्कल्पद्रुमसमस्ततः ।
चक्रे वसुंधरा येन काञ्चनैरनकिञ्चना ॥ ५२ ॥

[11] कुङ्कुमेशस्य A, B, C.

Digitized by Google

दण्डे मण्डपिका हैमी सह मत्तैर्मतंगजैः ।
दत्त्वा पादं गले येन जाङ्गलेशादगृह्यत ॥ ५३ ॥
जामदग्न्य इवोद्दामधामभर्त्सितभास्करः ।
क्षत्त्रान्नक्षालितां धात्रीं श्रोत्रियत्राचकार[12] यः ॥ ५४ ॥
दानानि ददतो नित्यं नित्यं दण्डयतो नृपान् ।
नित्यमुद्वहतो नारीर्यस्यासीच्चिगणः समः ॥ ५५ ॥
धृतपार्थिवनेपथ्ये निष्क्रान्तेत्र शतक्रतौ ।
जयन्ताभिनयं चक्रे मूलराजस्तदङ्गजः ॥ ५६ ॥
चापलादिव बालेन रिङ्खता समराङ्गणे ।
तुरुष्काधिपतेर्येन विप्रकीर्णा वरूथिनी[13] ॥ ५७ ॥
यच्छिन्नम्लेच्छकङ्कालस्थलमुच्चैर्विलोकयन् ।
पितुः प्रालेयशैलस्य न स्मरत्यर्बुदाचलः ॥ ५८ ॥
द्रुतमुन्मूलिते तत्र धात्रा कल्पद्रुमाङ्कुरे ।
उज्जगामानुजन्मास्य श्रीभीम इति भूपतिः ॥ ५९ ॥
भीमसेनेन भीमोयं भूपतिर्न कदाचन ।
बकापकारिणा[14] तुल्यो राजहंसदमक्षमः ॥ ६० ॥
मन्त्रिभिर्माण्डलीकैश्च[15] बलवद्भिः शनैः शनैः ।
बालस्य भूमिपालस्य तस्य राज्यं व्यभज्यत ॥ ६१ ॥
अथ तत्रैव चौलुक्यवंशे शाखान्तरोद्गतः ।
अर्णोराजः स राजर्षिस्तन्नामर्षत[16] विप्लवम् ॥ ६२ ॥
धवलस्य सुतेनापि तेन कृष्णानुकारिणा ।
राष्ट्रं निष्कण्टकीकर्तुमारेभे सुभटेन तत् ॥ ६३ ॥

---

[12] श्रोत्रियत्रांच° A. [13] विरूथिनी C. [14] बकापहारिणा A, B.
[15] मंडलीकैश्च A, B. [16] तममर्षत A, B, C.

Digitized by Google

विस्फुरत्तीव्रहेतीनां दवानामिव सर्वतः ।
दुष्टानां व्यधितानिष्टं यत्कृपाणपयोधरः ॥ ६४ ॥
विचिन्वता रुचिं हैमीं द्विषदुद्वेगदायिना ।
व्याप्तं यस्य प्रतापेन यशसा च जगत्त्रयम् ॥ ६५ ॥
आ संभवादुदूढस्य निर्व्यूढस्य च संगरे ।
प्राणैरुद्यापनं चक्रे निजशौर्यव्रतस्य यः ॥ ६६ ॥
तत्पुत्रः प्रसरत्कीर्तिपताकाचुम्बिताम्बरः ।
श्रीलावण्यप्रसादोस्ति प्रासादः शौर्यसंपदः ॥ ६७ ॥
आकाशमिव चन्द्रेण वारीन्द्रेणेव[17] काननम् ।
रम्यं तथानतिक्रम्यं कुलं येन बभूव तत् ॥ ६८ ॥
जघ्ने येनासिदण्डेन गाढं नडुलनायकः ।
निर्घातेनैव तेनामी कम्पन्तेद्यापि भूभृतः ॥ ६९ ॥
न चौरास्तत्र सौराज्ये दौरात्म्यं कुर्वते क्वचित् ।
स्वयमेष पुनः कीर्तिं हरति प्रतिभूभुजाम् ॥ ७० ॥
तेजस्तदिह दान्तारिदशमस्तकलङ्कयोः ।
बभूव भुजयोर्यस्य रामलक्ष्मणयोरिव ॥ ७१ ॥
पुण्डरीकं दधत्येकं राजहंसाननेकशः ।
आकृष्टारियशःफेनं प्रतस्थे तस्य वाहिनी ॥ ७२ ॥
समन्ततोपि सामन्तगोष्ठश्चैर्निष्ठुरोक्तिभिः ।
नासीन्नृपतिनागस्य यस्य लीलागतिक्षतिः ॥ ७३ ॥
पुरो मन्दरवद्वीक्ष्य यं निष्कम्पतया स्थितम् ।
विनिवृत्तमुपेत्यापि धाराधीशपयोधिना ॥ ७४ ॥

---

[17] मृगेन्द्रेणेव C.

Digitized by Google

दक्षिणः क्षोणिपालोपि घनसैन्योल्पविक्रमः ।
येन तद्विपरीतेन परित्यजति विग्रहम् ॥ ७५ ॥
श्रीवीरधवलस्तस्य सूनुर्वीरशिरोमणिः ।
युद्धे जयश्रियं धन्वज्यारावैराजुहाव सः ॥ ७६ ॥
आत्मानमात्मजे तस्मिन्नशेषगुणभूषणम् ।
स पिता दर्पणप्राये संक्रान्तमिव पश्यति ॥ ७७ ॥
बाहुभ्यामिव विक्रान्तो दन्ताभ्यामिव कुञ्जरः ।
अधृष्यः पितृपुत्राभ्यां वंशस्ताभ्यां बभूव सः ॥ ७८ ॥
कृतविश्वमुदानेन दानेन प्रतिवासरम् ।
सुतेन जनता तेन तातेन च समृध्यते ॥ ७९ ॥
अप्यरातिशराघातजातव्रणनतोन्नते ।
वीरलक्ष्मीश्चिरं यस्य वासं[18] वक्षसि वाञ्छति ॥ ८० ॥
वीरः समरकासारे शिरोभिः सह वैरिणाम् ।
करीव पुण्डरीकाणि कन्दयुक्तानि योग्रहीत् ॥ ८१ ॥
अरातिराजन्यशराभिघातैः प्रघातभूमौ पतितोत्थितो यः ।
गभीरवीरेन्द्रबलाम्बुराशेर्लब्धैरगाधं पुनरुन्ममज्ज ॥ ८२ ॥
अथैकदाकन्दलितप्रतापसंतापिताशेषविपक्षपक्षः ।
निशावसाने स निशातबुद्धिः प्राबुध्यत श्रीलवणप्रसादः ॥ ८३ ॥
प्रबुद्धमात्रोपि कुमारपुत्रमाकारयामास नृपावतंसः ।
पुरोधसे तत्किल रात्रिदृष्टं शिष्टाय तस्मै विनिवेदयिष्यन् ॥ ८४ ॥
समेत्य सोमेश्वरदेवनामा नमस्यते स्वस्ति निगद्य चास्मै ।
प्रसन्नमूर्तेः पुरतः स तस्य[19] दृष्टादरो विष्टरमाससाद ॥ ८५ ॥

---

[18] वस्तुं C. [19] पुरतः सुतस्य ; A.

Digitized by Google

पुरस्कृतस्यास्य पुरः पुरारिप्रसादलब्धं लवणप्रसादः ।
वीरेण तेनानुगतः सुतेन तं स्वप्नमित्थं कथयांबभूव ॥ ८६ ॥
जानेद्य विद्याधरसुन्दरीभिर्दरीगृहद्वारविहारिणीभिः ।
भृङ्गारितं भृङ्गमहं महाद्रेरारूढवानूढवृषध्वजस्य[20] ॥ ८७ ॥
कृतासनं तन्मणिवेदिकायां जायाङ्कितामर्धतनुं दधानम् ।
प्रसन्नवक्त्राब्जमहं सिताब्जैर्जगत्पतिं पूजयितुं प्रवृत्तः ॥ ८८ ॥
विसृज्य पूजामथ मन्मथारेः समाधिमुद्रां विदधामि यावत् ।
तावत्पुनः कामपि वामनेत्रां राकामिवाकारवतीमपश्यम् ॥ ८९ ॥
श्वेतांशुतुल्यं वदनं वहन्तीं श्वेतांशुकां श्वेतविलेपनां ताम् ।
श्वेतां कराग्रे दधतीं च मालामालोक्य बालामतिविस्मितोस्मि ॥ ९० ॥
कस्यासि कासि त्वमिहासि कस्मादिति ब्रुवे यावदुपागतां ताम् ।
तावत्तयैवाभिहितोस्मि कान्तदन्तद्युता दत्तसितातपत्रः ॥ ९१ ॥
हे वीर वैरिध्वजिनीगजेन्द्रगण्डस्थलीमण्डनखण्डचण्ड ।
प्रत्यर्थिसार्थेन कदर्थ्यमानां जानीहि मां गूर्जरराजलक्ष्मीम् ॥ ९२ ॥
दिवं गतास्ते बत गूर्जरेन्द्रास्ते कुञ्जरेन्द्राश्च हताः सपत्नैः ।
येषां क्षमाभृद्दलनक्षमेषु भुजेषु दन्तेषु च मे निवासः ॥ ९३ ॥
यो वर्तते संप्रति चक्रवर्तिपदेत्र[21] बालः स बलान्यरीणाम् ।
क्षमः समग्राणि न निग्रहीतुं दीपस्तमांसीव तटस्थितानि ॥ ९४ ॥
ये मन्त्रिणो येत्र च मण्डलीकास्तेषु क्रमो नास्ति पराक्रमोस्ति ।
प्रतिक्रिया कास्तु[22] ततोस्ति येषां कामो मयि स्वामिपरिग्रहेपि ॥ ९५ ॥
आस्ते सहस्तः स पुमान्न कोपि यो मामिमामुद्धरते निमग्नाम् ।
ग्रहीतुमेते हि सतां विभूतिं शतं वितन्वन्ति नराः कराणाम्[23] ॥ ९६ ॥

---

[20] °बूढवृष° B.
[21] वर्ती A, B, C.
[22] कास्ति A, B.
[23] वितस्वंति नराकराणां A, B, C.

Digitized by Google

सौवस्तिको नास्ति स आमशर्मा वर्माथितं येन सुधर्मणा मे ।
गतः स मुञ्जीलसुतश्च[24] मन्त्रैर्यः क्षत्त्रसर्पानकरोद्विदर्पान् ॥ ९७ ॥
न राष्ट्रकूटान्वयकैटभारिः[25] प्रतापमल्लोस्ति मृधैकमल्लः ।
गन्धोपि मत्तारिमतङ्गजानां गन्धद्विपेनेव न येन सेहे ॥ ९८ ॥
विना जगद्देवमिमामवस्थां[26] नीता निजैरेव परैरिवाहम् ।
यत्र स्थिते वेत्रिणि शङ्कितैर्न द्विष्टैः प्रविष्टं पुरि गूर्जराणाम् ॥ ९९ ॥
अवाप्तवेदाम्बुधिरोधसा च पुरोधसा तेन कुमारनाम्ना ।
विनाद्य चैद्यक्षिति[27]पाललक्ष्मीं को मे करिष्यत्यपरः सपत्नीम् ॥ १०० ॥
या मूलराजान्वयजातराजतेजोभिरासीद्विरजत्तमस्का ।
निशागमे सांप्रतमुद्दसायां[28] तस्यां न दीपोपि नरेन्द्रपुर्याम् ॥ १०१ ॥
निरन्तरं संचरतां गजानां या डिण्डिमैरुद्डमरा[29] ध्वनद्भिः ।
एकाकिनी रात्रिषु गूर्जराणां साफूत्करोतीव शिवारुतैः पूः[30] ॥ १०२ ॥
क्रीडावतीनां नगराङ्गनानां वक्त्रैः सदा यत्र सरोजसत्ता ।
सरस्तदभ्राणि किरत्यनार्यं वातास्तपाथःकणकैतवेन ॥ १०३ ॥
मुण्डेव खण्डितनिरन्तरवृक्षखण्डा
निष्कुण्डलेव दलितोज्ज्वलवृत्तवप्रा ।
दूरादपास्तविषया विधवेव दैन्य-
मभ्येति गूर्जरधराधिपराजधानी ॥ १०४ ॥
तस्मात्स्वचक्रपरचक्रहृतावशेषां
निःशेषिताखिलसपत्न समुद्धरस्व ।
यस्मादमानवचरित्रपवित्रितेन
संभावनात्र भवता भुवनेर्जितासौ ॥ १०५ ॥

---

[24] मुञ्जालसुत° C. [25] °कुटा°. [26] जगद्देनि°. [27] वैद्य° C.
[28] उद्दसत्यां A. [29] संदुमरा. [30] पुः B.

Digitized by Google

एकेन केशिरिपुणा विधृतं यदुच्चै-
भीरेण भङ्गुरमिवासुरभूपतीनाम् ।
तद्वीर वीर धवलेन सुतेन भूयः
संभूय भूवलयमुद्धर संप्रति त्वम् ॥ १०६ ॥
व्याहृत्य कृत्यमिति सा सहसा च कण्ठ-
पीठे निवेश्य विशदामिह पुष्पमालाम् ।
कुत्रापि तत्र भवती सह निद्रया मे
यातायथ यूयमिह जल्पत नः किमेतत् ॥ १०७ ॥
इत्थं वदन्नथ हरिप्रतिहस्तकोसौ
सौवस्तिकेन जगदे जगदेकवीरः ।
स्वप्नोयमर्थमकदर्थतया ददानो
व्याख्यानमिच्छति भवानिव नैव देव ॥ १०८ ॥
राजन्यधन्यतममन्यमहं न मन्ये
प्रस्तारिवीरभुजवैभवतो भवत्तः[31] ।
या न स्पृशत्युपनतानपरान्कदापि
यत्त्वामुपेन्द्रमिव सा वृणुते स्वयं श्रीः ॥ १०९ ॥
युष्मादृशामसदृशान्वयसंभवानां
न श्लाघ्यते जगति केन कुलार्गलासौ[32] ।
अग्रेसरी भवति दुश्चरितप्रवृत्तौ
या संगरव्यतिकरापसृतौ तु पश्चात् ॥ ११० ॥
उद्गच्छतस्तव रवेरिव संपराये
छायेव संमुखमुपैति न शत्रुसेना ।

[31] °भवन्तः A, B, C. [32] C has got the text changed to कुलागतासौ.

Digitized by Google

दीपाङ्कुरा इव दशान्तमुपेयिवांस-[55]
स्तेजो निजं मुकुलयन्ति च मण्डलीकाः ॥ १११ ॥

आनीतवानसि गुणैर्गुरुभिः स्वकीयै-
र्बद्धा नृपश्रियमिमां सुभटोपभोग्याम् ।
सन्मन्त्रिभिस्तदनुरञ्जय मञ्जुमूर्ते
व्यावर्तते न हि यथा त्वदवस्थितासौ ॥ ११२ ॥

दृप्यद्भुजाः क्षितिभुजः श्रियमर्जयन्ति
नीत्या समुन्नयति मन्त्रिजनः पुनस्ताम् ।
रत्नावलीं जलधयो जनयन्ति किं तु
संस्कारमत्र मणिकारगणः करोति ॥ ११३ ॥

पित्रा विचित्ररचितानुकृताच्युतेन
तेनाथ वीरधवलो बलवान्नियुक्तः ।
युक्तश्च भूभरसमुद्धरणे विधात्रा
चिन्तां चकार सचिवेषु शुचिक्रियेषु ॥ ११४ ॥

अथ दशरथकल्पस्त्यक्ततल्पः प्रभाते
स च नृपतिरपत्यं तच्च रामोपमेयम् ।
स च परिचरणीयो गूर्जराणां विशिष्ट-
प्रतिकृतिरुदतिष्ठत्कर्म साध्यं विधातुम् ॥ ११५ ॥

इति गूर्जरेश्वरपुरोहितश्रीसोमेश्वरदेवविरचिते कीर्तिकौमुदीनाम्नि महाकाव्ये नरेन्द्रवंशवर्णनो नाम द्वितीयः सर्गः ॥ २ ॥

---

[55] विशान्त° A, B, C.

Digitized by Google

मन्त्रिस्थापना ।

रसालंकरणे तस्मिन्नालवालानुकारिणि ।
प्रांशुः प्राग्वाटवंशोभूत्पुरे गूर्जरभूभुजाम् ॥ १ ॥
त्वचिसाराः परे वंशाः सदा पत्त्राणि बिभ्रति ।
क्रियासारश्च वंशोयं धत्ते पात्रपरंपराम् ॥ २ ॥
नररत्नैर्यदुत्पन्नैरुद्भूताद्भुतकान्तिभिः ।
विभूषिता विशेषेण जगतीव सरस्वती ॥ ३ ॥
मन्त्रिमण्डलमार्तण्डश्चण्डपः प्रथमः पुमान् ।
कुले तस्मिन्नुदेतिस्म तमसामवसानकृत् ॥ ४ ॥
चाणक्यादिव चातुर्यं गिरमाङ्गिरसादिव ।
अम्भोधेरिव गाम्भीर्यं यः शुभैकाग्रहोग्रहीत् ॥ ५ ॥
न च्छिद्रं क्षुद्रमप्यत्र मन्त्रिरत्ने न्यवेशयत्[1] ।
धात्रा केन प्रकारेण सोनुस्यूतगुणः कृतः ॥ ६ ॥
मानी नामन्यत श्लाघ्यां यः श्रियं सरसीरुहाम्[2] ।
यैर्मनागपि न म्लानमिनपादावधीरितैः ॥ ७ ॥
तद्भूश्चण्डप्रसादोभूद्भङ्गाडिण्डीरपाण्डुभिः ।
यशोभिः ककुभां येन चक्रे श्रीखण्डमण्डनम् ॥ ८ ॥
कदाचिदपि न त्यक्तः पाणिपद्मगृहीतया ।
गेहिन्येव वदान्योयं नृपव्यापारमुद्रया ॥ ९ ॥
मृदुर्वाणी मतिस्तीक्ष्णा साधुः श्रीः कीर्तिरित्वरी ।
वीतरागं मनो यस्य स्फीतरागं करद्वयम् ॥ १० ॥

[1] निवेशितम् C. [2] सरसि° A, B. C had originally the same reading, but it is changed into मानिनामन्यत: श्लाघ्यां य: श्रियं सरसि रुहाम्.

Digitized by Google

यः पराभूतकर्पूरैः कीर्तिपूरैर्निरन्तरम् ।
चिरं विरचयामास राकामाकालिकीमिह ॥ ११ ॥
सोमः समुद्रतस्तस्मादुज्जगाम मनोरमः ।
सवित्री जातमात्रेण येन द्यौरिव दिद्युते ॥ १२ ॥
अपूर्वः कोपि सोमोयं कलङ्कविकलाकृतिः ।
न हि मारपुरस्कारं चक्रे भावं च नो भवे ॥ १३ ॥
निदधे गुणरत्नानां यत्र कोशः स्वयंभुवा ।
तत्र श्रीसिद्धराजोपि रत्नकोशं न्यवीविशत् ॥ १४ ॥
स्वं मेने येन सोमेन पूर्णेनाभ्यर्णवर्तिना ।
गृहीतानन्तभोगः श्रीसमिद्धेधि[3]कमीश्वरात् ॥ १५ ॥
सावित्रं बिभ्रता तेजः सीतां च सहचारिणीम् ।
काकुस्थेनेव येनापि नदीनातिक्रमः कृतः ॥ १६ ॥
अमेयमहिमा श्रीमानश्वराजस्ततोभवत् ।
येन दानार्द्रहस्तेन हस्तिराजोप्यजीयत ॥ १७ ॥
तस्माच्चिरन्तरत्यागस्थगिताश्रितदुःस्थितेः ।
निजैरिवेन्द्रियैर्लब्धा कामना न मनागपि ॥ १८ ॥
आनीतं न्यायतो वित्तं व्यसितं धर्मकर्मसु ।
यशस्तु जगति स्तुत्यं केवलं यस्य तिष्ठति ॥ १९ ॥
प्राकृतां रेणुकाबाधां[4] स्मरन्ननुशयादिव ।
मातुर्विशोषतश्चक्रे भक्तिं यः पुरुषोत्तमः ॥ २० ॥
जनन्या जठरे मासानध्युवास दशैव यः
हृदयाम्भोरुहे तस्य यावज्जीवमियं पुनः ॥ २१ ॥

---

[3] श्रीसमिद्धः सोधि° A; °समिद्धेधि° B, C.
[4] प्राकृता...बाधा A, B, C.

Digitized by Google

सततं सचिवश्रेणिमाणिक्यस्याङ्गसङ्गिनी ।
कान्ता कुमारदेवीति तस्य कान्तिरिवाभवत् ॥ २२ ॥
स्वाभाविकेन शौर्येण मान्याः सुमनसामपि ।
प्रवाहा[5] इव जाह्नव्यास्तया सूताः सुताश्चयः ॥ २३ ॥
मुख्यः श्रीमल्लदेवाख्यो वस्तुपालाह्वयस्ततः ।
तेजःपालाभिधः पश्चात्त्रयी भाति त्रयीव सा ॥ २४ ॥
पुरुषाणामिमास्तेषां परेषामिव मूर्तयः ।
त्रिधा विभिद्यमाना अप्येकैव परमार्थतः ॥ २५ ॥
स्वयं शुद्धेषु यत्तेषु गुरुणा शौचशिक्षणम् ।
घनसारपरागेण मार्जनं मौक्तिकेषु तत् ॥ २६ ॥
यल्लब्धं[6] मल्लदेवेन यशः शुभ्रं विभाव्य तत् ।
शिष्टैर्न विष्टपे दृष्टं कैरवं कैरवज्ञया ॥ २७ ॥
इयती मल्लदेवस्य कौस्तुभेन विभिन्नता ।
जिनो हृदि यदेतस्य जिनस्य त्वपरः सदा ॥ २८ ॥
वस्तुत्वं वस्तुपालस्य सैव वेत्ति सरस्वती ।
तदीयवदनाम्भोजे या वसत्यनुवासरम् ॥ २९ ॥
स्थितं पुरुषयोर्मध्ये पूर्वजानुजयोस्तयोः ।
मन्यते मध्यमं यः स्वमुत्तमं तं जनः पुनः ॥ ३० ॥
किमस्तु वस्तुपालस्य मन्त्रीन्दोः साम्यमिन्दुना ।
यद्दत्ते वसुधामेष सुधामेवापरः पुनः ॥ ३१ ॥
वृद्धिं न्यग्रोधशाखीव स प्राप्नोति यथा यथा ।
क्षमालंकरणः केषां नाश्रयः स्यात्तथा तथा ॥ ३२ ॥

---

[5] प्रवाह B, A, C. [6] तल्ल° A, B, C.

Digitized by Google

षड्भिरेव गुणैर्येन कापि कीर्तिपटी कृता ।
वसुंधरा धराम्भोधिसहिता पिहिता यया ।। ३३ ।।
मन्ये मनसि साधूनां यो वसत्यनुवासरम् ।
वदनुक्तोपि जानीते विधत्ते च तदीप्सितम् ।। ३४ ।।
अहंकरोति नात्मानं त्वंकरोति न सद्गुरून् ।
यः पुनः प्रधनारम्भे हुंकरोति विरोधिनः ।। ३५ ।।
दयिता ललितादेवी यस्य सर्वाङ्गहारिणी ।
अर्धाङ्गहारिणीं[7] पत्युः पार्वतीं हसतीव या ।। ३६ ।।
तस्मादमात्यजीमूतात्सुक्षेत्रेस्मिन्सुताङ्कुरः ।
जयसिंहाह्वयः सोयं बालोपि फलितः सताम् ।। ३७ ।।
पूर्वे सर्वेपि तार्यन्ते निस्तार्यन्ते तथार्थिनः ।
एतेन यस्य पोतेन प्रतार्यन्ते न तु प्रजाः ।। ३८ ।।
तेजःपालः पुनस्तेषु सोदरेषु लघुः किल ।
निजप्रभुप्रसादेन गुरुणापि न लङ्घ्यते ।। ३९ ।।
छन्दःशास्त्रे श्रुतास्माभिर्लघुतापि क्वचिद्गुरोः ।
तस्मिन्बन्धुजने दृष्टा गुरुतास्य लघोरपि ।। ४० ।।
अश्वराजात्मजावेतौ नासत्यावमृतौषधैः ।
संप्रति प्रतिकुर्वाते सर्वमप्यातुरं जगत् ।। ४१ ।।
अमी सुमनसस्तेन स्पर्धन्तामुद्धताः कथम् ।
सोपि सद्बुद्धिना येन जितः सुमनसां गुरुः ।। ४२ ।।
अपूर्वं तस्य वैदुष्यं यद्दिक्पालैः स्वभूभुजा ।
समानैर्देशभिः सार्धं मेने संध्यक्षराणि यत् ।। ४३ ।।

---

[7] हारिणी ... पार्वती B, C.

Digitized by Google

शुभं स्वभावमालोके लोकेस्मिन्नेकमेव तम् ।
यदुक्तं[8] तत्करोत्येव यत्कृतं तन्न वक्ति यः ॥ ४४ ॥
उपकृत्ये कृती पुंसां वित्ते वेषां न केवलम् ।
अपि यः स्तुतिलज्जायां[9] सचिवो दुर्गतस्पृहः ॥ ४५ ॥
उपकर्ता सतामन्यैरुपकारयिता च यः ।
हरते हि मरुत्तापं हारयत्यपि वारिदैः ॥ ४६ ॥
वात्ययेवोन्नतिं नीतः श्रिया तृणसमः पुमान् ।
क्षमां त्यजति न त्वेष शिखरीवोदयन्नपि ॥ ४७ ॥
अपूर्वं मन्त्रिमाणिक्यं चाणक्यमिह[10] मन्महे ।
यद्बुधावलये येन सदानन्दोदयः कृतः ॥ ४८ ॥
यद्यप्यनुपमा नाम प्रेयसी तस्य मन्त्रिणः ।
मूर्त्या तथापि मन्येहमेनां मेनाङ्गजामिव ॥ ४९ ॥
लावण्यसिंहनामानं सा लावण्यवतंसिनम् ।
तनयं जनयामास विनयावर्जितप्रजम् ॥ ५० ॥
भूमिभर्तुरथ कर्तुमिच्छतस्तस्य सत्पुरुषसंग्रहं[11] श्रिये ।
एकदा हृदयमागतावितौ दीप्रशीतकिरणाविवाम्बरम् ॥ ५१ ॥
तद्गुणान्निपुणया मनीषिणामग्रणीर्धिषणया विमृश्य सः ।
आजुहाव च समागतौ च तौ कार्यसिद्धिरविलम्बिनी सताम् ॥ ५२ ॥
तत्र तौ ददृशतुः शतक्रतुप्रायमायतभुजं महीभुजम् ।
सानुजं च सचिवं स दृष्टवानर्थजुष्टमिव धर्ममग्रतः ॥ ५३ ॥
तावुपायनमुपायपण्डितौ[12] मण्डितौजसिकपद्धतेः पुरः ।
उद्गृणन्त्य चरणद्वयं मुदा तस्य वीरतरणेः प्रणेमतुः ॥ ५४ ॥

---

[8] तदुक्तं B, A, C. [9] स्तुतिलम्बायां B. [10] चाणिक्य B, A, C.
[11] तत्पुरुष° B, A. [12] °मुपायमण्डितौ B.

Digitized by Google

तेन वेनतनयानुकारिणा कर्तुमात्मकरणाधिकारिणौ ।
सप्रसादबदनेन सादरं सोदरौ समुपवेशितावि मौ ॥ ५५ ॥
तस्य निर्दलितभूरिभूभृतः स्वःपतिप्रतिकृतेः[15] कृतासनौ ।
अध्वराजतनुजौ रराजतुस्तौ सुरासुरगुरूपमौ पुरः ॥ ५६ ॥
एतयोर्विनयनम्रमस्तकन्यस्तसंपुटितपाणिपद्मयोः ।
निर्ममे समदशत्रुदन्तिनामङ्कुशः स कुशलानुयोजनम् ॥ ५७ ॥
नीलनीरदरवानुवादिना नादयन्नथ दिशः स्वरेण सः ।
तौ पुनश्चरितचातकव्रतौ वक्तुमारभत मारसंनिभः ॥ ५८ ॥
आकृतिर्गुणसमृद्धिशंसिनी नम्रता कुलविशुद्धिसूचिका ।
वाक्क्रमः कथितशास्त्रसंक्रमः संयमश्च युवयोर्वयोधिकः ॥ ५९ ॥
श्लाघ्यतां कुलमुपैति पैतृकं स्यान्मनोरथतरुः फलेग्रहिः ।
उन्नमन्ति यशसा सह श्रियः स्वामिनां च पुरुषैर्भवादृशैः ॥ ६० ॥
यौवनेपि मदनान्न विक्रिया नो धनेपि विनयव्यतिक्रमः ।
दुर्जनेपि न मनागनार्जवं केन वामिति नवाकृतिः कृता ॥ ६१ ॥
आवयोस्तु पितृपुत्रयोर्महानाहितः[14] क्षितिभरः पुरद्रुहा ।
तद्युवां सचिवपुंगवावयं योक्तुमत्र युगपत्समुत्सहे ॥ ६२ ॥
विद्युदञ्चलचलाचलश्रियं संनिवेश्य सचिवेषु साधुषु ।
संप्रहारभरसंभृतश्रमाः शेरते सुखममी क्षमाभुजः ॥ ६३ ॥
येन केन च सुधर्मकर्मणा भूतलेत्र सुलभा विभूतयः ॥
दुर्लभानि सुकृतानि तानि यैर्लभ्यते पुरुषरत्नमुत्तमम् ॥ ६४ ॥
मत्पितुर्भुजयुगेन संयुगादाहृतां[15] जितयुगश्रिया श्रियम् ।
अक्षरक्षणविचक्षणौ युवां नित्यमेधयतमिद्धया धिया ॥ ६५ ॥

---

[13] °त्यति B.
[14] °नाहतः B, A, C.
[15] °हाहता A, B, C.

Digitized by Google

इत्युदीर्य भुजवीर्यशालिना[16] मुद्रिता[17] दशनचन्द्रिकामुना ।
वस्तुपालवदनारविन्दतः स्यन्दते स्म मधु वाङ्मयं ततः ॥ ६६ ॥
देव सेवकजनः स गण्यते पुण्यवत्सु गुणवत्सु चाग्रणीः ।
यः प्रसन्नवदनाम्बुजन्मना स्वामिना मधुरमेवमुच्यते ॥ ६७ ॥
सप्रसादवदनस्य भूपतेर्यत्र यत्र विलसन्ति दृष्टयः ।
तत्र तत्र शुचिता कुलीनता दक्षता सुभगता च गच्छति ॥ ६८ ॥
जायते जलदवृन्दवृष्टिभिः शाखिनां सफलता शनैः शनैः ।
तुष्यतां[18] क्षितिभृतां तु दृष्टिभिस्तत्क्षणादपि नृणां फलोदयः ॥ ६९ ॥
नास्ति तीर्थमिह पार्थिवात्परं यन्मुखाम्बुजविलोकनादपि ।
नश्यति द्रुतमपायपातकं संपदेति च समीहिता सताम् ॥ ७० ॥
जीवनाय मनुजन्मनामिह भ्राम्यतामथ कदापि स प्रभुः ।
त्वादृशो भवति भाग्ययोगतो वेत्ति यः सदसतां यदन्तरम् ॥ ७१ ॥
किं तु विज्ञपयितास्मि किंचन स्वामिना तदवधार्यतां हृदा ।
न्यायनिष्ठुरतरा गिरः सतां श्रोतुमप्यधिकृतिस्तवैव यत् ॥ ७२ ॥
सा गता शुभमयी युगत्रयी देव[19] संप्रति युगं कलिः[20] पुनः ।
सेवकेषु न कृतं कृतज्ञता नापि भूपतिषु यत्र दृश्यते ॥ ७३ ॥
ते राजानः स्वर्गताश्चक्रिरे यैर्वीरैर्वीर क्ष्मापतीनां प्रबन्धाः ।
तेपि प्राप्तास्तत्र सन्मन्त्रिणो ये श्लोकांस्तेषां शोधयन्तिस्म शुद्धाः ॥७४॥
दृष्टिर्नष्टा भूपतीनां तमोभिस्ते लोभान्धान्सांप्रतं कुर्वतेमे ।
यैर्नीयन्ते वर्त्मना तेन यत्र भ्रश्यन्त्याशु व्याकुलास्तेपि तेपि ॥७५॥
न सर्वथा कश्चन लोभवर्जितः करोति सेवामनुवासरं विभोः ।
तथापि कार्यः स तथा मनीषिभिः परत्र बाधा न तथात्र वाच्यता ॥७६॥

---

[16] 'शालिनि C. [17] मुद्रता B, A, C. [18] पुष्यतां B.
[19] दैव C. [20] कालि A, B, C.

Digitized by Google

पुरस्कृत्य न्यायं खलजनमनादृत्य सहजा-
नरीन्निर्जित्य श्रीपतिचरितमाश्रित्य च यदि ।
समुद्धर्तुं धात्रीमभिलषसि तत्सैष शिरसा
धृतो देवादेशः स्फुटमपरथा स्वस्ति भवते ॥ ७७ ॥
सचिववचनमेतच्चेतसा सोत्सवेन
क्षितितलतिलकोयं कृत्स्नमाकर्ण्य सम्यक् ।
अकृत कनकमुद्राकान्तिकिञ्जल्कसान्द्रं
करसरसिजयुग्मं मन्त्रियुग्मस्य तस्य ॥ ७८ ॥
अवनिपतिरनेन भूरिधाम्ना सचिवयुगेन चिराद्विराजमानः ।
पतगपतिरिवारिनागनाशं जनयति पक्षयुगेन संयुगे सः ॥ ७९ ॥

इति गूर्जरेश्वरपुरोहितसोमेश्वरदेवविरचिते[21] कीर्तिकौमुदीनाम्नि महाकाव्ये मन्त्रिस्थापनो नाम तृतीयः सर्गः ॥ ३ ॥

दूतसमागमनम् ।

श्रीवीरस्य धरोद्धारधुरीणस्योपधारणम् ।
चक्रतुः सचिवावेतौ पादौ सुरगिरेरिव ॥ १ ॥
ताभ्यां कल्याणरूपिभ्यां मन्त्रिभ्यामधिकाधिकम् ।
नृपाखण्डलराज्यश्रीः कुण्डलाभ्यामिव व्यधात् ॥ २ ॥
न्यायं[1] निवेशयन्नुर्व्यां निर्व्याजः स्वजनः सताम् ।
स्तम्भतीर्थं जगाम श्रीवस्तुपालो विलोकितुम् ॥ ३ ॥

---

[21] इति श्रीसोमे° C. [1] न्यायंति B; °शयन्मु° B, A.

Digitized by Google

स्तम्भतीर्थे[2] मनस्तीर्थप्रभाव इव...
केषाममोपनोदोषमीप्सितानि ददौ च यः ॥ ४ ॥
तमन्यमिव सश्रीकं समुद्रमवलोकयन् ।
ईर्ष्ययेव पयोभङ्गैर्भ्रूभङ्गं विदधेम्बुधिः ॥ ५ ॥
कोप्यपूर्वः समुद्रोयमपापः पृथिवीतले ।
यस्मात्प्रसरति स्वादुरसपूरा सरस्वती ॥ ६ ॥
प्रविवेश पुरे तत्र स पश्चान्मन्त्रिसत्तमः ।
तस्यागमे तु पौराणां प्रमोदः प्रथमं हृदि ॥ ७ ॥
हट्टे हट्टे पटोत्तम्भस्तोरणं च गृहे गृहे ।
पुरुषे पुरुषे प्रीतिः संप्राप्ते तत्र मन्त्रिणि ॥ ८ ॥
धान्यैर्धन्यमिव क्षेत्रं फलैरिव घनं वनम् ।
सरः पूर्णमिवार्णोभिस्तेनाभूच्चारु तत्पुरम् ॥ ९ ॥
क्रूरैर्ग्रहैरिवाक्रम्य मुक्तमन्यैर्नियोगिभिः ।
प्रीणात्येष पुरं मन्त्री नक्षत्रमिव चन्द्रमाः ॥ १० ॥
पुरं रोगैरिव ग्रस्तमपैररधिकारिभिः[5] ।
सद्वैद्य[4] इव तन्त्रज्ञो मन्त्री प्रतिकरोति यः ॥ ११ ॥
केनाप्यन्येन या चक्रे सतां पीडाधिकारिणा ।
वार्यते वस्तुपालेन सा संप्रत्यधिकारिणा[5] ॥ १२ ॥
प्रत्यावृत्तिः[6] कृतस्येव कलेरिव गलग्रहः ।
बलेः पुनरिवोत्थानं स मेने द्युमनःशतैः ॥ १३ ॥

---

[2] All the three copies have the first line incomplete and the second incorrect as given above. C suggests शाम्भवः to fill up the blank in the first. [3] °मपारे° B, A, C. [4] तद्वैद्यइव C.
[5] °त्यधिकारिणी B. [6] °वृत्तिक° B, A °वृत्तिकृ° C.

Digitized by Google

निशासु नीचसंभोगसंभूतधनकामना ।
सत्यत्र मन्त्रिमाणिक्ये गाणिक्येनापि तत्यजे ॥ १४ ॥
सर्वत्रोच्छ्वसितं सद्भिः खलानां म्लानमाननैः ।
निराकृतदुराचारं व्यापारं तत्र तन्वते ॥ १५ ॥
सांयान्त्रिकजनो येन कुर्वाणो हरणं नृणाम् ।
निषिद्धस्तदभूद्देष धर्मोदाहरणं भुवि ॥ १६ ॥
स्पृष्टास्पृष्टनिषेधाय विधायावधिवेदिकाम् ।
पुरे[7]स्मिन्वारितस्तेन तक्रविक्रयविभ्रवः ॥ १७ ॥
धात्रा स्थानेषु भग्नेषु ताम्यतामाश्रयः[8] सताम् ।
सद्वंशः सद्गुणश्चायं पटावास इवाभवत् ॥ १८ ॥
स्वामिना सत्प्रसादेन पाणिर्यद्यपि मुद्रितः ।
तथाप्युन्मुद्रितस्तस्य वित्तविभ्राणनक्षणे ॥ १९ ॥
स्निग्धैः संभाषणैरेव यस्य द्रविणवर्षिणः ।
अर्थिनामुपशाम्यन्ति दौस्थ्यनिश्वासवायवः ॥ २० ॥
स्थानभ्रष्टस्य यः साधोराधारः सारवत्तया[9] ।
जटाजूटः सुरस्रोतःप्रवाहस्येव शाम्भवः ॥ २१ ॥
लोकेस्मिन्नवमन्वाने जाने वैराग्यमागताः ।
सरस्वत्यास्पदं तीर्थमिव यं शिश्रियुर्गुणाः ॥ २२ ॥
महतां विद्यमानानां[11] वित्तेनोपकरोति यः ।
स्वर्गतानां जरत्पूर्तकीर्तनोद्धरणेन तु[12] ॥ २३ ॥

---

[7] पुरेत° B. [8] ताम्यताश्र° B. [9] °स्मारव° B.
[10] सरास्रोतः B सुरःस्रोतः A °श्रोत C. [11] वर्तमानानां C.
[12] B reads the first line thus: स्वर्गतानां जरत्कीर्तिपूर्तनोद्धरणे ननु; but it is corrected in the same thus: स्वर्गतानां जरत्पूर्वकीर्तनोद्धरणे प्रभुः; स्वर्गतानां जरत्कीर्ति कीर्तनोद्धरणेन तु C.

Digitized by Google

प्रासादास्तेन[13] देवानामुद्धृताः कारिताश्च ये ।
नवत्वमेव विख्यातमसंख्येष्वपि तेष्वभूत्[14] ॥ २४ ॥
यन्यूनं यत्र यन्नष्टं यस्तत्र तदचीकरत् ।
उत्पत्तिरुत्तमानां हि रिक्तपूरणहेतवे ॥ २५ ॥
अकल्पयदनेकानि[15] देवेभ्यः काननानि यः ।
हरनेत्राग्नितापस्य यत्र न स्मरति स्मरः ॥ २६ ॥
रम्भासंभावितैर्यस्य वनैर्वृषनिषेवितैः ।
मनोज्ञसुमनोवर्गैः स्वर्गसौन्दर्यमाददे ॥ २७ ॥
संगृहीतानि हारीतशुकचित्रशिखण्डिभिः ।
धर्मशास्त्रसधर्माणि यस्योद्यानानि रेजिरे ॥ २८ ॥
दर्शयन्सुमनोभावं श्रीमत्तामतुलामयम् ।
काननानां स्वबन्धूनां स्वबन्धूनामिवाकरोत् ॥ २९ ॥
सरांसि राजहंसालीशालीन्ययमचीखनत् ।
तेनैव तुल्यता येषां स्यादस्ताघतया तया[16] ॥ ३० ॥
आददानाः पयःपूरं यत्कासारेषु कासराः ।
विराजन्तेतरां पारावारेष्विव पयोधराः ॥ ३१ ॥
अकारयदयं [17]वापीरपापी यः क्रियारतः ।
सुधाया अपि माधुर्यं यज्जलैर्गलहस्तितम् ॥ ३२ ॥
ताः प्रपाः कारितास्तेन यदीयं पिबतां पयः ।
तृप्यन्त्यास्यानि पान्थानां न रूपं पश्यतां दृशः ॥ ३३ ॥
भवार्णवतरी[18] ब्रह्मपुरी येनात्र निर्ममे ।
यस्यां गायन्ति[19] सामानि नरा नार्यस्तु तद्यशः ॥ ३४ ॥

---

[13] प्रसादाः B. [14] °धुभूत् C. [15] °दनल्पानि C.
[16] B and C give as a revised reading, स्यदस्ताद्येतया तया:.
[17] वापिरपापीक्रि° A, C. [18] भवार्णवरी° A. [19] गायति B, A.

Digitized by Google

स्फुटं वेष्टयता शुभ्रैः कीर्तिकूटैः पटैरिव ।
दशापि[20] ग्राहिता येन दिशः श्वेताम्बरव्रतम् ॥ ३५ ॥
येन पौषधशालास्ताः कारितास्तारितात्मना ।
मध्ये श्वेताम्बरैर्यासां विशुद्धिः सुधया बहिः ॥ ३६ ॥
यस्य पौषधशालासु यतयः संवसन्ति ते ।
सदा येषामदाराणामात्मभूसंभवः कुतः ॥ ३७ ॥
ज्ञानाख्यं यस्य तच्चक्षुर्वाचा देवी ददे मुदा ।
नित्यं येनैष धर्मस्य गतिं सूक्ष्मामपीक्षते[21] ॥ ३८ ॥
अयं जगति मध्यस्थः स्पष्टं सृष्टिकृता कृतः ।
धर्माध्वानस्तदेतस्य स्थिताः सर्वेपि तावति ॥ ३९ ॥
नानर्च भक्तिमान्नेमौ नेमौ शंकरकेशवौ ।
जैनोपि यः सवेदानां दानाम्भः कुरुते करे ॥ ४० ॥
लभन्ते लोभतः पापाः शापानन्ये नियोगिनः ।
अधिकारमधिक्कारममात्यः पात्यसौ पुनः ॥ ४१ ॥
अथ गूर्जरराजराज्यलक्ष्मीं रमणीयां चरचक्षुषा निरीक्ष्य ।
पृतनां द्रुतमादिदेश दूतीमिव तत्संग्रहणाय दक्षिणेन्द्रः ॥ ४२ ॥
श्रुतसिङ्घनसैन्यसिंहनादप्रसरा गूर्जरराजराजधानी ।
हरिणीव हरिन्मुखावलोकं चकितान्तःकरणा[22] मुहुश्चकार ॥ ४३ ॥
गृहमारभते न कोपि कर्तुं कुरुते कोपि न संग्रहं कणानाम् ।
स्थिरतां क्वचनापि नैति चेतः परचक्रागमशङ्क्या प्रजानाम् ॥ ४४ ॥
अवधीरितधान्यसंचयानां बहुमानः शकटेषु मानवानाम् ।
विपदामुदये हि दुर्निवारे शरणं चक्रभृदेव देहभाजाम् ॥ ४५ ॥

---

[20] दयापि B. [21] °पीक्ष्यते B, A, C. [22] °करणां C.

Digitized by Google

समुपैति यथा यथा समीपं रिपुराजध्वजिनी मदान्तदानीम् ।
परतः परतस्तथा तथासौ जनता जातभयोच्छ्रया प्रयाति ॥ ४६ ॥

तदवेत्य जवेन यादवेन्दोर्बलमागच्छदतुच्छवीरगर्वम्[23] ।
भृकुटीकुटिलं चकार कोपादलिकं श्रीलवणप्रसाददेवः ॥ ४७ ॥

उपकण्ठमकुण्ठविक्रमस्य स्फुरदुल्लप्रसरा हिरण्मयी स्रक् ।
शुभुभेस्य चुलुक्यभूपलक्ष्म्या भयवत्या[24] निहितेव बाहुवल्ली ॥ ४८ ॥

परिपन्थिवरूथिनीं[25] प्रभूतां स नृपस्तुच्छपरिच्छदोप्यगच्छत् ।
बलिनाप्यरिणा रणप्रवृत्तौ शुभटानां हि पदानि संमुखानि ॥ ४९ ॥

बलवारिधिराजगाम शत्रोरुपतापीतटमुर्वरोपतापी ।
रभसादभिधावतिस्म वीरः स महीतीरमहीनबाहुशक्तिः ॥ ५० ॥

प्रचुरं तदरातिराजचक्रं तदजय्यं च बलं चुलुक्यभर्तुः ।
विमृशन्बहुशोपि संदिहानो न जनो निश्चिनुते गतिं स्थितिं वा[26] ॥५१॥

रिपुसैन्यनिवेशभूः[27] प्रजानां विदिताभूदनिवेदितापि दूतैः ।
गगनाङ्गणगाहनोल्बणैस्तज्ज्वलितग्रामसमूहधूमकूटैः ॥ ५२ ॥

भृगुकच्छमहीमहीनसस्यां चरतस्तानचिरेण वृष्णिवर्गान् ।
न बहूनपि दुर्जयानजय्यः समरेमन्यत वीरकेसरी सः ॥ ५३ ॥

प्रसरत्यथ मत्सरप्रबन्धे द्रुतमेकेन रणोल्बणं कृपाणम् ।
अपरेण स्रुतं करेण वीरं सहसा संयति यान्तमेष दध्रे ॥ ५४ ॥

क्षितिपान्तरविग्रहप्रसक्तौ पितृपुत्रावथ विग्रहीतुमेतौ ।
विदितावसरैश्चिराच्चतुर्भिर्मरुभूपैः सहसोपचक्रमाते ॥ ५५ ॥

---

[23] °वीरवर्गम् B. [24] °भूपलक्ष्मीनय° B, A ; भूपलक्ष्मीम° C ; but C notes the reading °लक्ष्मीन marginally. [25] °विरूथिनी C. [26] B has the fourth foot without the words न जनो. [27] °निवेशिभूः B, A.

Digitized by Google

उभयोरनयोश्चतुर्भिरेभिर्विगृहीतिर्विहिताथ सापि पृष्ठे ।
इयतैव बुधैर्विबोधनीयं सुभटत्वं मृधमूर्ध्नि यस्य यावत् ॥ ५६ ॥
अथ गोद्रहलाटदेशनाथौ मरुनाथैर्निभृतं निबद्धसंधी ।
विधुरे परिहृत्य तत्र मित्रद्वितयं यत्कटकादुपेयतुस्तान् ॥ ५७ ॥
असतोरबलं तयोः सतोर्वा सबलं स्वं मनुतेस्म नैष वीरः ।
जलधिर्विगतैरुपागतैः स्याच्चहि भिद्योद्यजलैः क्षयी चयी वा ॥५८॥
पुरतो यदि सिङ्धुनस्य सैन्यं यदि पृष्ठे मरुभूभुजश्च तौ च ।
न बभूव तयोरचिन्त्यशक्त्योर्मुखरागस्य विपर्ययस्तथापि ॥ ५९ ॥
पुरतः सरतो यदुप्रवीराननुगच्छन्समरे करीव[28] मत्तः ।
व्यथितः प्रतिपार्थिवैः स पश्चात्सपदि व्यावववृते नृपः सकोपः ॥ ६० ॥
जगति ज्वलिताखिलप्रदेशः प्रचुरीभूतमलिम्लुचप्रचारः[29] ।
स परस्परविग्रहो ग्रहाणामिव तेषामभवन्नरेश्वराणाम् ॥ ६१ ॥
अवलोक्य चुलुक्यपार्थिवौ तौ विपरीतैर्बहुभिर्नृपैः परीतौ[30] ।
खरशीतकराविवाम्बुवाहैर्जनतेयं मनुतेस्म दुर्दिनं तत् ॥ ६२ ॥
वलितेपि चुलुक्यपार्थिवेस्मिन्न कृतं तैर्यदुभिः पुरः प्रयाणम् ।
हरिणैरनुगम्यते न मार्गो हरिणा तत्क्षणमाश्रितोज्झितोपि[31] ॥ ६३ ॥
हरितं परिहृत्य चन्दनाद्रेरथ गन्तुं हिमभूभृतः प्रवृत्तः ।
अभवल्लवणप्रसादशूरः प्रसरत्तीव्रतरप्रतापरौद्रः ॥ ६४ ॥
सहजा इति येषु बन्धुबुद्धिः प्रथमाभूदथ तान्विकारकर्तॄन् ।
षडपि द्विषतो विमृश्य जेतुं नृपवीरः स पुनश्चकार योगम् ॥ ६५ ॥
प्रसृतेथ महीभृतां विरोधे क्षयसिन्धाविव सिन्धुराजसूनुः ।
प्रणिधिं प्रजिघाय मन्त्रिणेस्मै तृणवद्विश्वमपि स्मयेन पश्यन् ॥ ६६ ॥

[28] गच्छत् B, A; कवीव B.
[29] प्रचरी° B, A.
[30] परीतौ: B, A.
[31] °क्षणामातोज्झितोपि B.

Digitized by Google

चुलुकोद्भवभूपतेरमात्यं भयकालेपि निराकुलं तमेत्य ।
प्रणिधिः प्रणिपत्य च प्रवीणो विनयर्च्छन्नमदामुवाच वाचम् ॥६७॥
सुभटैरपरैर्विमुक्तमस्त्रं समरोर्वीषु य एक एव धत्ते ।
अथवा भुवने निराश्रयाणां शरणं किं नु तथाविधैर्विनास्तु ॥ ६८ ॥
दलितेपि दले स्थितः समित्यां यदुभिर्यो बहुभिर्धृतः कथंचित् ।
हृदयेषु गुणार्जितेषु तेषामपरेषामपि विभ्रमं जगाम ॥ ६९ ॥
विधृतेपि सुतेत्र तत्सवित्रा न सपत्राकृतमानसा तथाभूत् ।
समरेपि भयंकरेपि वक्तुः[32] समसत्त्वेन नयेन लज्जितासौ ॥ ७० ॥
अवलोकितमात्र एव गुप्तेर्यदुसिंहेन विमोच्य सिन्धुनेन ।
निदधे भुजपञ्जरे स्वयं यः क्व लभन्ते गुणिनो हि न प्रतिष्ठाम् ॥ ७१ ॥
विधुरेपि न मुञ्चते निजं यः कुलधर्मं च कुलान्वयप्रदीपः ।
स यदाह मदाननेन शङ्खः शृणु तन्मन्त्रिमणे[33][वचः]स्वपथ्यम् ॥७२॥
विषमेपि कथं स सत्यमार्गे स्खलतु श्रीलवणप्रसादपुत्रः ।
प्रददाति पदे पदे प्रबुद्धः सचिवो यस्य भवान्करावलम्बम् ॥ ७३ ॥
निपुणोसि गुणेषु षट्सु जाने पुनरेषा तव धीरता कुतस्त्या ।
व्यसने समुपस्थितेपि भर्त्तुर्यदशङ्कः कुरुषेधिकारमेकः ॥ ७४ ॥
अपि[34] वेत्ति भवानपीदृशं यत्पितृभुक्तिर्मम पत्तनं यदेतत् ।
स्वधनग्रहणार्थमागतोहं समयज्ञोसि तदर्प्यतामिदं मे ॥ ७५ ॥
यदि संप्रतिपत्तिरस्ति चित्ते नगरस्यास्य नियोगवासना च ।
प्रणम द्रुतमेत्य तत्प्रसन्ने मयि दूरे न तवाधिकारमुद्रा ॥ ७६ ॥
अपरोपि विधास्यतेधिकारी नगरे कश्चन पैतृके मयास्मिन् ।
भजसे यदि मां ततः स्थिरैव त्वयि मुद्रास्तु गुणाः प्रियाः प्रभूणाम् ॥७७॥

---

[32] वक्तः A, C. [33] °मणेस्वपथ्यम् A, B, C. [34] अवि B.

Digitized by Google

अथ चेतसि किंचिदन्यथा ते स्थितमास्ते तदपि प्रियंकरं नः ।
यदसाध्यविरोधसाधनाय प्रतिभूरस्ति ममैष खड्गदण्डः ॥ ७८ ॥
अवलेपमलीकमाश्रितो यः प्रभुमभ्यर्थिन[35]मन्यथा करोति ।
कुपितेन स तेन दण्ड्यमानः सह जीवेन ददाति वित्तजातम् ॥ ७९ ॥
अथ स व्यथितोपि तद्वचोभिर्न विकारं प्रकटीचकार मन्त्री ।
मलिनत्वमुपैति वातनुन्नैर्न रजोभिः सुरवाहिनीप्रवाहः ॥ ८० ॥
जगदे जगदेकबन्धुनैवं सचिवेनापि सरङ्गचाः स चारः ।
भवताभिहितं यदात्मभर्त्तुश्चरितं तन्न चमत्करोति कस्य ॥ ८१ ॥
तरणेरिव सिन्धुराजसूनोर्महसा कुम्भसहेन शुष्कदेहम् ।
दहतिस्म सुखेन लक्ष्मदेवद्रुममुच्चैरपि यादवेन्द्रदावः ॥ ८२ ॥
समरैकरतेरमुष्य सत्त्वं[36]स्तुतिकोलाहलकाहलानिनादैः ।
श्रुतिमार्गमुपैति मर्त्यलोके सुभटानामभिधायिनां परेषाम् ॥ ८३ ॥
विपरीतमतित्वमस्य मन्ये यदसावर्थयते [पुनः] पुरं तत् ।
हयसैन्यसहायतोपि सिंहान्नृपसिंहेन विगृह्य यद्गृहीतम् ॥ ८४ ॥
बहुभिः सह योद्धुमक्षमं मे मनुते स्वामिनमेष तन्मृषैव ।
ननु निश्चयनिश्चलस्य पुंसस्त्रिदशा यान्ति सहायतां[37] क्रियासु ॥ ८५ ॥
बकपाटकचेष्टितं न दृष्टं न च सिद्धेश्वरसंनिधानयुद्धम् ।
किमनेन मनस्विनो यदस्य क्षितिमाकाङ्क्षति लीलयैव लब्धुम् । ८६ ॥
तनयः पितृवित्तमर्हतीति व्यवहारः पुरुषान्तरेषु युक्तः ।
परसंपदपेक्षिणां नृपाणां स कृपाणेन कृतः पुनः प्रमाणम् ॥ ८७ ॥
तदुपेहि पतिं स्वमेवमस्मद्वचसा ब्रूहि च देव वेत्सि सर्वम् ।
अवलेपममुं विमुञ्च नो चेदयमस्मि त्वमितो[38] विचार्य कुर्याः ॥ ८८ ॥

---

[35] °मल्पार्थि° A, C.
[36] सत्त्वे B, A.
[37] सहाता B ; सहायता A, C.
[38] त्वमतो C.

Digitized by Google

श्रुत्वा वचः सचिवचक्रशतक्रतोस्त-
द्भूयोप्यभाषत रुषा परुषाक्षरं सः ।
आः किं ब्रवीषि मदमन्दमतिस्त्वमेवं
देवस्य तस्य नियतं न हि वेदितासि ॥ ८९ ॥
कुर्वाणस्त्वयि शस्त्रधारणमसावस्मत्पतिर्लेज्जते
येनैकेन रणाङ्गणेवगणितः सेनाघनः सिङ्घनः ।
तत्ते चेतसि चेद्विचारकणिका काप्यस्ति[39] तन्मुच्यताम्
मानोयं नयवेदिनाथ भवता वर्मेदमामुच्यताम् ॥ ९० ॥
अथ सचिवमवश्यमाहवाय प्रवणमतिं मतिमानयं विदित्वा ।
पवन[40] इव वनोन्मुखं कृशानुं विभुमभिषेणनवाञ्छमभ्यगच्छत् ॥ ९१ ॥

इति गूर्जरेश्वरपुरोहितश्रीसोमेश्वरदेवविरचिते कीर्तिकौमुदीनाम्नि महाकाव्ये दूतसमागमनोनाम चतुर्थः सर्गः ॥ ४ ॥

युद्धवर्णनम् ।

कथितारिविचारेण चारेण प्रेरितस्ततः ।
सिन्धुराजात्मजः सिन्धुर्वायुनेवोदजृम्भत ॥ १ ॥
कुपितः करवालेन सिन्धुराजाङ्गभूर्बभौ ।
कल्पान्तविप्लुतः शम्भुः कृतान्तेनेव संगतः ॥ २ ॥
भृकुटीघटना भाले तस्य भाति स्म[1] भीषणा ।
त्र्यक्षचक्षुर्यया जिग्ये युगान्तोद्वान्तपावकम् ॥ ३ ॥

---

[39] कोप्यस्ति C. [40] यवनइवबभोन्मुखं B ; यवन इव वनोन्मुखं A, C.
[1] भातिस्सभिषणा A ; °स्सभीषणा B, C.

Digitized by Google

रुषा स्मितमुखः शङ्खः शङ्खपाणिसमच्छविः ।
नोभवद्भीतये कस्य सितविद्युदिवाम्बुदः ॥ ४ ॥

स प्रतस्थे हयोदस्तैः[2] परागपटलैर्घनैः ।
प्रावृषं राजहंसानामकाले कल्पयन्निव ॥ ५ ॥

केतुपत्रमयच्छत्रच्छन्ना[3] तस्य पताकिनी ।
जङ्गमोद्यानलेखेव दोःस्थिताया जयश्रियः ॥ ६ ॥

झटित्यागत्य साटोपो वटकूपसरस्तटे ।
व्याचष्ट पटहोद्घोषैर्द्विषामेष स्वमागतम् ॥ ७ ॥

निस्वाननिस्वमा [ना] नस्य स्वकर्णाभ्यर्णमागतान् ।
उदस्रभृकुटीभङ्गा मन्त्री प्रत्युदगादिव ॥ ८ ॥

मन्त्री यद्यपि गाम्भीर्याद्भावं नाविश्चकार तम् ।
तथाप्येष कृतोत्थानैर्व्यक्तीभूतः शिरोरुहैः ॥ ९ ॥

संनद्धसैनिकः शङ्खो भिन्नशृङ्ग इव द्विपः[4] ।
सङ्गरावेशदुर्वारः संचचार शनैः शनैः ॥ १० ॥

स चौलुक्यनृपामात्यः संचरत्यरिसंचये ।
सैन्यमारचयामास[5] त्रासमुक्तेन चेतसा ॥ ११ ॥

चन्दनागरुकर्पूरकस्तूरीकुसुमस्रजः ।
स्वःस्त्रीसंभोगमिच्छद्भिरिव धीरैर्वदध्रिरे ॥ १२ ॥

संनाहः सङ्गरारम्भसंभवत्सत्त्वसंपदः ।
उच्छ्वसत्या[6] अमात्यस्य न मात्यस्य तनौ तदा ॥ १३ ॥

---

[2] हयोदस्त्रैः A ; हयोदस्रैः B, C. [3] केपि.....च्छत्रा A, C ; °च्छत्रा B.
[4] संनिद्ध A, B ; भिन्नशृङ्ग इवाद्विपः B, C ; भिन्नशृङ्ग इवाद्विपाः A.
[5] °चरयामासशश° A. [6] उच्छ्वसात्याममात्यस्य A ; उछसात्यामतात्यस्य B,C.

Digitized by Google

दक्षिणेनाङ्घ्रिणा क्षोणिक्षोदनाजयशंसिनम् ।
आरुरोह जवादश्वमश्वराजाङ्गसंभवः ॥ १४ ॥
श्रीवीरनृपमुद्रां[7] यः सदा धारयते करे ।
वीरशूद्रकमुद्रापि[8] धृता तेन तदा हृदि ॥ १५ ॥
भटा भुवनपालाद्या यद्यप्यग्रे तदाभवन् ।
तथापि स पुरस्तेषां पौरैः शूरतया मतः ॥ १६ ॥
अग्रे शङ्खचमूचक्रं मध्येप्रहरणाङ्गणम् ।
पारेरत्नाकरं वीरशिरोरत्नमसौ स्थितः ॥ १७ ॥
समासन्नेपि संग्रामे शौर्योद्रेकं[9] न भाषितैः ।
स चक्रे सचिवोत्तंसः क्रियासारा हि तादृशाः ॥ १८ ॥
स्थितं संख्यमुखे शङ्खस्तं वीक्ष्य विकसन्मुखम् ।
पाणौ रणरसोत्तालः करवालमलालयत् ॥ १९ ॥
स्थितेत्र संमुखे[10] शङ्खः प्रवेष्टुं नाशकत्पुरीम् ।
रोहिणीं रोषरौद्रोपि व्यथादशरथोशनिः ॥ २० ॥
चलन्मन्त्रिबलोत्क्षिप्तः क्षोणीरेणुगणो ननु ।
उदेष्यतः प्रतापाग्नेर्धूमराशिरिवोत्थितः ॥ २१ ॥
धूलिध्वान्तोदये तस्मिन्मुखोद्योतेन मन्त्रिणः ।
प्रतापः प्रकटीचक्रे श्रीवीरधवलप्रभोः ॥ २२ ॥
प्रभूतमपि तत्सैन्यं क्षोभायाभून्न[11] मन्त्रिणः ।
तेल्पेपि बहवो येषां रणारम्भे स्थितं मनः ॥ २३ ॥
स्थितेन तेन धीरेण कर्तुमद्वैतमात्मनः ।
गोष्टीक्षमः समित्यां[12] यः स्याद्वादी सचिवो यदि ॥ २४ ॥

---

[7] नृपमुद्राय A, B.
[8] वीरशूरक A.
[9] सौर्योद्रेद A, B.
[10] सन्मुखे A, B, C.
[11] क्षोभयाभून्न A.
[12] समित्यांसः A.

Digitized by Google

वाहिन्योस्तत्र संभेदे स कोपि तुमुलोभवत् ।
यस्याग्रे मन्द्रतामेति सामुद्रोपि महाध्वनिः ॥ २५ ॥
अवाञ्चितानि चापानि भ्रुवोर्युग्ममुदञ्चितम् ।
भ्रुभटैः कोपसाटोपैः सेनयोरुभयोरपि ॥ २६ ॥
काण्डानां सहकोदण्डगुणैः संधिरजायत ।
तेषां वीरप्रकाण्डानां विग्रहस्तु परस्परम् ॥ २७ ॥
कर्णे लगद्भिरन्येषामन्येषां जीवितव्ययम् ।
कुर्वाणैर्वेदधे बाणैः स्पष्टं दुर्जनचेष्टितम् ॥ २८ ॥
तत्राहवमहातीर्थे विशिखैर्गुणनिर्गतैः ।
भित्त्वा विकर्त्तनं चक्रे परस्मिन्पुरुषे लयः ॥ २९ ॥
विहाय शरधिं वेगाच्चापमापुः शिलीमुखाः ।
चिह्नमेतत्सपक्षाणां विधुरे यत्पुरः स्थितिः ॥ ३० ॥
वक्षो विक्षिप्य वैपक्षं पत्त्रिणः परतो गताः ।
न चिरं निर्गुणैर्लभ्या धीराणां ह्यवस्थितिः ॥ ३१ ॥
खड्गिनः खड्गिभिः[13] कुन्तपाणयः कुन्तपाणिभिः ।
योधा योधैर्हयारूढा हयारूढैश्च संगताः ॥ ३२ ॥
मन्त्रीशकरसंसर्गादिव दानार्थमुद्यतः ।
असिरुत्सृष्टवान्कोशं बद्धमुष्टिरपि क्षणात् ॥ ३३ ॥
वीराणां पाणिपादाब्जैः पूजितेवाहवक्षितिः ।
दत्तार्घे [र्घे] व[14] च दूर्वाभाकेशमिश्रैः शिरःफलैः ॥ ३४ ॥
अहिंसाव्रतभङ्गेन का स्याच्चस्यात्र वाच्यता ।
पुरुषव्रतनिर्वाहो येन तादृक्कृतस्तदा ॥ ३५ ॥

---

[13] खड्गिनः खड्गिभिः A. [14] दत्तार्थव A, B ; दत्तार्घेव C.

Digitized by Google

अहिंसाभङ्गसंभूतां मन्त्री मार्ष्टुं मनःखिदम् ।
चक्रे दिव्यमिव स्नानं स शूरः शरवृष्टिभिः ॥ ३६ ॥
प्रभुप्रोत्साहनं पृष्ठे मागधोत्तेजनं पुरः ।
विक्रान्तानां विशेषेण जातं विक्रमवृद्धये ॥ ३७ ॥
उद्दिश्यापि द्विषा मुक्तैर्न मन्त्री बिभिदे शरैः ।
अदृष्टः कोपि शिष्टानां बद्धकक्षो हि रक्षणे ॥ ३८ ॥
सुभटासृक्सरित्पूरः पुरस्ताद्दुस्तरो यदि ।
तथापि न विशश्राम मन्त्री शत्रूनभिव्रजन् ॥ ३९ ॥
विभाव्य तमसंभाव्यमवष्टम्भं रणे रिपोः ।
स्वचमूचरसंहारमारब्धं च परैः पुरः[15] ॥ ४० ॥
वीरः संग्रामसिंहोथ संख्ये शङ्खापराह्वयः ।
आविर्भावितवानुच्चैर्निजसंरम्भसौरभम्[16] ॥ ४१ ॥
अपि भूपल्लवोल्लासः परैर्यस्य सुदुःसहः ।
तस्य संग्रामसिंहस्य खड्गोल्लासं सहेत कः ॥ ४२ ॥
तमङ्कमिवमायान्तमनपेक्षितजीवितः ।
भटो भुवनपालाख्यः शङ्खं प्रत्यभिजग्मिवान् ॥ ४३ ॥
सखा शङ्खस्य सामन्तः सेनां सीमन्तयन्नरेः ।
बलाद्बुलकुलोत्तंसमभ्ययुङ्क्त[17] तमन्तरा ॥ ४४ ॥
शस्त्रैः शस्त्रेषु भमेषु तयोरप्रतिमल्लयोः ।
मल्लयोरिव संजज्ञे केशाकेशि भुजाभुजि ॥ ४५ ॥
वियति प्रेक्षमाणाभिरप्सरोभिर्मृधं तयोः ।
बहु मेने स्वकीयानां चक्षुषामनिमेषता ॥ ४६ ॥

---

[15] °सङ्गार A, B, C.
[16] °भावितभानुचैः A ; संख्यशंखा° C.
[17] कुलोत्तंसः मभ्य° C.

Digitized by Google

सामन्तमन्तकस्यान्तं स नीत्वा सत्वरं पुनः ।
समं संग्रामसिंहेन संग्रामं कर्तुमभ्यगात् ॥ ४७ ॥
शङ्खेन खड्गपातैस्तैः[18] खण्डं खण्डं कृतं वपुः ।
संख्ये भुवनपालस्य पौरुषं न तु खण्डितम् ॥ ४८ ॥
स वीरो मन्त्रिवीरस्य शङ्खासिव्यस्तमस्तकः ।
तस्य प्रभुप्रसादस्य प्राणैरुच्छ्रवणोभवत्[19] ॥ ४९ ॥
श्रुत्वा भुवनपालस्य निधनं मृधमूर्धनि ।
मन्त्री तेनैव वैरेण रणाय प्रवणोधिकम् ॥ ५० ॥
प्रियं विक्रामतां क्रेतुमसुभिः[20] सुलभं यशः ।
धृतासिः प्राविशद्वीरो वीरमः समरापणम्[21] ॥ ५१ ॥
शङ्खपत्तिर्जयन्तश्च मन्त्रिपत्तिश्च वीरमः ।
उभौ शम्भू सतां[22] यातौ सचिवादौ जयश्रिये ॥ ५२ ॥
वैरिणामपि वीरेण रणान्तर्व्ययितात्मना ।
वाचि वाचि गदेवेन स्वबाहुस्तुतिराहिता ॥ ५३ ॥
स्थित्वा विपद्यमानेन भग्नेपि स्वचमूजने ।
पदे पदे कृतः स्तोमः सोमसिंहेन संगरे ॥ ५४ ॥
स्वामिशत्रुमहत्वापि मृतोस्मीति ह्रिया किल ।
विजयेन तथा यातं नेहायातं यथा पुनः[23] ॥ ५५ ॥
(भू)तलक्षेप(बुद्धे)व[24] शङ्खेनदृढमाहतः ।
भटो भुवनसिंहस्तु सपदि त्रिदिवं गतः ॥ ५६ ॥
प्राणेभ्योपि प्रियं शस्त्रं क्षत्राणामिति निश्चयः ।
तथाभ्युदयसिंहेन त्यक्तास्ते नोज्झितं तु तत् ॥ ५७ ॥

---

[18] खड्गयातैस्तैः B.
[19] °रुच्छ्रावणो° A, C.
[20] क्रेतुमसुभिः A, B, C.
[21] समरार्पणम् A.
[22] शम्भुसतां A; C.
[23] तथा पुनः A, B.
[24] तलक्षेपद्वेवशङ्खेनदृढमाहतः A, B, C.

Digitized by Google

स्वखड्गखण्डितैर्वीर[25]शिरोभिर्विषमीकृते ।
पेदे विक्रमसिंहेन क्रोधान्धेन मृधाध्वनि ॥ ५८ ॥
वि म भ्यः कुलसिंहेन दर्शनात् ।
चक्राच वि स्फुक्कुंते युद्धे वैकुण्ठबुद्धिना ॥ ५९ ॥
भित्त्वा भल्लीभिरङ्गिभ्यो निर्गताननपङ्क्तिभिः ।
उद्गलन्शुशुभे तत्र शोयंद्रमवोदलः ॥ ६० ॥
पश्यतः सचिवं हीरं तथैव स्थितमग्रतः ।
शङ्ख्स्यापि चमत्कारः प्रससार तदा हृदि ॥ ६१ ॥
विकारवर्जितं वीक्ष्य साक्षात्तं पुरुषं परम् ।
प्रबुद्धमिव शङ्खेन विरमत्कोपसंपदा ॥ ६२ ॥
चौलुक्यचन्द्रसचिवेन्द्रमवार्यशक्तिं
मत्वा स्थितं स्थगयताथ रजोभिराशाः[26] ।
आकम्पितप्रचुरपत्रनृपाङ्गिपेण
शङ्खेन यानमपसृत्य महाबलेन ॥ ६३ ॥
मन्त्रीश्वरोयमनुभूतभटोपमर्द-
सौवर्णपिण्ड इव सोढहुताशतापः ।
आनन्दकन्दलितबाष्पविलोचनेन
लोकेन पूजितमतीव बभाज तेजः ॥ ६४ ॥
संग्रामसिंहः[27] स महानियोगी योगी यथा योगबलेन कालम् ।
संहर्त्तुमायान्तमतीत्य चक्रे कुशाग्रबुद्धिः कुशलं पुरस्य ॥ ६५ ॥
संवीक्ष्य वीररसरोपितरोमराजि-
राजिक्षितिं[28] क्षतभटामिषमार्धगृध्राम्[29] ।

---

[25] वार C ; °वर्षमी° A, B, C. [26] °राशा B, A, C.
[27] संग्रामसिंहस° B, A, C. [28] °राजी B. [29] मर्द्धिग्रध्राम् B, C, A..

Digitized by Google

मन्त्री न्यवर्तत ततः प्रमदोपहूतैः[30]
सूतैः पुरः प्रतिपदोदितदोर्विभूतिः[31] ॥ ६६ ॥
संधाय बन्धुजनताजनितोपरोधा-[32]
द्वीरै[33] र्विरुद्धहृदयोपि समं नृपस्तैः ।
पुत्रेण तेन सह दुःसहपौरुषेण
स्वार्थां ससाद नगरीं लवणप्रसादः ॥ ६७ ॥
प्रतिनृपतिभिर्भमोत्साहैर्निमग्नमिव क्वचित्
स च नरपतिर्वीरस्तीरं जगाम मृधाम्बुधेः ।
दिशि दिशि यशःस्तोमान्सोमान्वयी समचारय-
च्चतुरतुरलीचाणक्योयं[34] प्रियंकरणैर्गुणैः ॥ ६८ ॥

इति गूर्जरेश्वरपुरोहितश्रीसोमेश्वरविरचिते कीर्तिकौमुदीनाम्नि महाकाव्ये युद्धवर्णनोनाम पञ्चमः सर्गः ॥ ५ ॥

पुरप्रमोदवर्णनम् ।

श्रीवस्तुपालेन बलान्निरस्तां तां दुस्तरामापदमाकलय्य ।
महोत्सवानामकृत प्रवृत्तिं वीतोपसर्गः[1] पुरवासिवर्गः ॥ १ ॥
गृहे गृहे धातुरसानुलेपाः समन्ततः स्वस्तिकपङ्क्तिमन्तः ।
विरेजिरे तूर्यरवानुकूलाः[2] कुलाङ्गनामङ्गलगीतयश्च ॥ २ ॥
बभूव देवेषु विशेषपूजा राजन्यमार्गेषु विशेषशोभा ।
विशेषहर्षः पुरपूरुषेषु[3] विशेषवेषश्च वधूजनेषु ॥ ३ ॥
येषां निमेषार्द्धमपि क्षपायामायान्न निद्रा रिपुविद्रवेण[4] ।
सुस्थीकृतानां सचिवोत्तमेन तेषां च हर्षान्तरितेयमासीत् ॥ ४ ॥

---

[30] °प्रमदोपूतैः B.
[31] °दोदितदोर्विभूतिः B.
[32] °जनितोप° C.
[33] द्वीरे B, A, C.
[34] चतुरली.....यंकारणै° C.
[1] वीत्तोपसर्गः A.
[2] °कूला B, A.
[3] परपूरुषेषु A.
[4] °रिषूविद्र° B, C, A.

Digitized by Google

पुरप्रजानां प्रमदामृतेन तेनातिमात्रं शिशिरीकृतानाम् ।
निःशेषिताशेषसरःसमृद्धिर्ग्रीष्मो[5] न भीष्मोप्यभवद्भयाय ॥ ५ ॥
शिरीषपुष्पप्रचयच्छलेन शुचिर्दधानो हृदयं प्रदीपः ।
आषाढवान्बाढमपास्तकामः कर्मन्दिकल्यस्तमुपाजगाम ॥ ६ ॥
अमात्यमालोक्य चुलुक्यभर्तुः कर्तुं स्थितं शत्रुभृतो निरस्त्रान् ।
मन्ये मनोभूरपि मन्दमन्दं चापक्रियाचापलमाचचार ॥ ७ ॥
दिङ्मण्डली पाटलिपुष्पगन्धसंबन्धसोन्मेषमरुन्मिषेण[6] ।
शान्तोपतापा सचिवेन तेन संतोषतः श्वासमिव व्यमुञ्चत् ॥ ८ ॥
अस्मान्सुखेनोत्तरतु भ्रमन्ती कीर्तिस्तदीयेति कृशास्तटिन्यः ।
बभूवुरासामसदेतदन्तः सा हि क्षमा सागरलङ्घनेपि ॥ ९ ॥
प्रतापिनः पल्लवितप्रतापः शुचिः शुचित्वाधिगतप्रसिद्धेः ।
कविप्रियोसौ प्रथयांचकार निन्दां निदाघस्य जडप्रियस्य ॥ १० ॥
पीयूषबिन्दुप्रसवं[7] स्रवन्ती गुणावलिर्यस्य गलन्तिकेव ।
स्थितोपरिष्टादपि विष्टपस्य प्रीतिं प्रतप्तस्य तदा ददाति ॥ ११ ॥
चतुर्दिगन्ताक्रमणोद्यतस्य नयन्नयं वृद्धिमिनस्य तेजः ।
तेनाभविष्यत्सचिवेन तुल्यः प्रजोपतापं यदि नाकरिष्यत्[8] ॥ १२ ॥
संशोषिताशेषनदे[9] निदाघे मन्त्रीशदृष्टिः कमलाभिरामा ।
तृष्णापहारं न चकार कस्य प्रपेव सन्मार्गमुपागतस्य ॥ १३ ॥
पुण्ड्रेक्षवः क्षीणरसाः सरस्यः[10] शुष्का विशुष्काश्च गवां समूहाः ।
चूतद्रुमो वा सचिवोत्तमो वा तदार्थिसार्थं सफली चकार ॥ १४ ॥

---

[5] समृद्धिर्ग्री° A, B.
[6] °पार्जलीपुष्पगन्ध संबधसोनमेघमरुन्मीषेण B °पार्जलि C.
[7] °प्रसरं C.
[8] नाकरिष्यता B, C; °ष्यत A.
[9] सशोषि° B, A.
[10] सरस्य C.

Digitized by Google

स्वरक्षितस्याथ पुरस्य तस्य वैशेषिकीं वीक्षितुमेष शोभाम् ।
इष्टां नमस्कर्तुमनाश्च देवीं श्रीवस्तुपालः सचिवश्चचाल ॥ १५ ॥
प्रसर्पतः प्रोषितगर्वभावात्परिच्छदो यद्यपि तस्य तुच्छः ।
स्त्रीभिः कृताः प्रेक्षणकाङ्क्षिणीभिस्ते संकटा राजपथास्तथापि ॥ १६ ॥
तं राजवीथ्यामथ संचरन्तमालोकयन्त्यः पुरलोककान्ताः ।
दातेति पातेति जयीति[11] नयीति क्षमीति वाग्मीति भृशं शशंसुः ॥१७॥
मनोरमाकारममात्यमेतमिवोपगन्तुं हृदयानि तासाम् ।
चक्रुः पुरस्तादुपढौकनाय फलद्वयं चारु कुचद्वयेन ॥ १८ ॥
तमन्तिके यान्तमवेत्य बन्दिशब्दैरथ द्रष्टुमगारगर्भात् ।
द्रुतं प्रयान्ती रसनानिनादैराकारयत्कापि सखीरिवान्याः[12] ॥ १९ ॥
जवेन यान्त्यास्तदवेक्षणाय[13] कस्याश्चिदम्भोजनिभेक्षणायाः[14] ।
काञ्ची सखीभिर्विधृता गलन्ती नितम्बतो न स्थिरता तु चित्तात् ॥ २० ॥
तदा तदालोकनलोलदृष्टिः संवृण्वती स्वाङ्गकमंशुकेन ।
हल्कोटरान्तर्निहितस्फुलिङ्गमनङ्गमन्या प्रकटीचकार ॥ २१ ॥
तेनाङ्गना प्रत्यवलोकितान्या त्रपातिभारेण भृशं नमन्ती ।
रराज कन्दर्पकिरातमुक्तसमापतन्मार्गणवञ्चिनीव ॥ २२ ॥
परा स्मरावेशनिवेशिताभ्युः प्रयुक्तनेत्रद्वितयाञ्जनापि[15] ।
सुधानिधानं सचिवप्रधानं नालोकितुं सम्यगलं बभूव ॥ २३ ॥
न पुष्पचापादपरोस्ति चापी यस्मादमात्यप्रणयोन्मुखीनाम् ।
न कञ्चुके किं चन वेधचिह्नं[16] भिन्नं मनस्तेन घनस्तनीनाम् ॥ २४ ॥
लज्जावती तं प्रति कापि बाला जालान्तरालेन दृशं मुमोच ।
इषुर्यदाजीयत वप्रमारमार्गागतः[17] कामचमूचरस्य ॥ २५ ॥

[11] जंयीत्यथीति B, C; जयीयीति A. [12] सखीरिवान्या B, A, C. [13] तदवेक्षणेन A. [14] अम्भोजनीभे; B अम्भोजनिभ A. [15] द्वितयाजनापि B, C, A. [16] कंचनिवेधचिह्न B, C, A. [17] मार्गोगतः B, A, C.

Digitized by Google

तद्दर्शनीनां हृदि सुन्दरीणां मनोभवक्ष्माधवकेलिसौधे ।
प्रभूतदुर्वारपरिच्छदोपि लेभे प्रवेशं सचिवेन्दुरेकः ॥ २६ ॥
मन्त्रीशमालोक्य सुलोचनानां स्वभावलोलान्यपि लोचनानि[18] ।
नान्यत्र कुत्रापि गतिं वितेनुर्गुणैस्तदीयैरिव बन्दितानि ॥ २७ ॥
श्रीखण्डमत्युत्सुकया कयाचिद्देहैकदेशे निहितं ततोपि ।
घर्माम्भसा मृष्टममात्यदृष्टाविष्टाग्निरल्पापि जडादपैति[19] ॥ २८ ॥
समीपमाजग्मुषि तत्र मन्त्रीमधौ दधाने सुमनःसमृद्धिम् ।
रोमोद्गमो यत्नवमञ्जरिश्रीर्मीकन्दमालेव परा व्यराजत् ॥ २९ ॥
उद्दामकामक्षितिपाज्ञयेव क्रियान्तराण्यर्द्धकृतानि मुक्त्वा ।
स्त्रीणां गणः श्रीकरणप्रधानममुं समालोकत सावधानः ॥ ३० ॥
खिन्नाध्वनि श्रोणिभरेण तावदद्य व्रजन्तं सचिवं विलोक्य ।
कापि प्रयातुं पदमप्यशक्ता सहामुना स्वं प्रजिघाय चेतः ॥ ३१ ॥
ग्रहैः शुभैः सत्यममात्यशम्भुर्दृष्टः[20] स दृष्ट्या परिपूर्णयेव ।
पुरोङ्गनानामनुरागिणीनां नेत्रत्रिभागेन विलोकितो यत्[21] ॥ ३२ ॥
तत्कालमुन्मीलितमीनकेतुज्वरातुराणां पुरसुन्दरीणाम् ।
अदत्त चित्तं न स दान्तचित्तस्तद्धर्मपत्न्याः प्रथमं हि दत्तम्[22] ॥ ३३ ॥
रेमे न रम्येपि वधूजनेत्र नेत्रद्वयं मन्त्रिमतल्लिकायाः ।
न तादृशास्तादृशसंयमेषु प्रलोभनाय प्रभवन्ति भावाः ॥ ३४ ॥
अथाशिषः सैष नतेन मूर्ध्ना गृह्णन्वितीर्णाः कुलबालिकाभिः ।
विभूषितस्तम्भपुरोपशल्यामेकल्लवीरां प्रददर्श देवीम् ॥ ३५ ॥
तां सप्तलोकप्रणतां प्रणन्तुं जगाम दूरे स दुरापकीर्तिः ।
न वेत्ति विद्वानपि संवसन्तीं वाणीस्वरूपेण निजे मुखाब्जे ॥३६॥

---

[18] सुलोचनानी B, A, C.
[19] जटादुपैति A.
[20] °मसत्यशम्भुः B, A, C.
[21] विलोकितोयम् A.
[22] पत्न्याहि प्रथमं हि दत्तम् B, C; पत्न्या प्रथमं A.

Digitized by Google

दुग्धेन दध्ना मधुना घृतेन खण्डेन तोयेन च शुद्धमूर्तिम्[23] ।
आनर्च[24] देवीं सचिवः प्रसूनकर्पूरकृष्णागरुचन्दनाद्यैः ॥ ३७ ॥
चकार देवीवदनारविन्दे स दन्तपङ्क्तिं घनसारखण्डैः ।
हर्षं वहन्तीं हृदि सप्रकर्षं साक्षात्सहास्येव बभौ यया सा ॥ ३८ ॥
नैवेद्यवृन्दैरनवद्यवृत्तैः शिष्टानुकूलश्च दुकूलकूटैः ।
धूपैरयं भूपसभानुरूपः प्रसादयामास दयाश्रयस्ताम्[25] ॥ ३९ ॥
नुत्या च नत्या च विशेषवत्या देवीं समानीय मुदं स मानी ।
श्रीवीरभूपालकृपाणदण्डे स्थितिं ययाचे हृदि च स्वकीये ॥ ४० ॥
अथोष्मणि ग्रीष्मसमुत्थितेंतर्दहे समास्कन्दति देहभाजाम् ।
शङ्के समग्रेपि रसः सशङ्कः स्वेदाम्बुदम्भेन बहिर्बभूव ॥ ४१ ॥
चण्डद्युतौ मण्डयति द्युमध्यं मध्यंदिनोद्दीपितदीप्तिदृप्ते[26] ।
समं स मन्त्री गुणिनां गुणेन क्रीडावनं प्राप सनीडवर्त्ति ॥ ४२ ॥
मन्त्री तदासाद्य वनं ननन्द ग्रीष्मं महीं[27] शोषयितुं स्थिते यत् ।
भ्रमद्घटीसंघटितारघट्ट[28]खाट्कारशब्दैः प्रतिगर्जतीव[29] ॥ ४३ ॥
दीर्घैर्दिनैर्दाघस्य[30] दिनैर्मनोभूरलब्धसिद्धिर्भजति स्म सम्यक् ।
वनस्य तस्यातिघनद्रुमस्य छायातमीं तारकितां प्रसूनैः ॥ ४४ ॥
अमात्यमत्यर्थमपास्तदौस्थ्यं पिकाङ्गनाकूजितकैतवेन[31] ।
उल्लासिमल्लीमुकुला[32]भदन्त्यः सत्यं स्तुवन्तिस्म वनाधिदेव्यः ॥ ४५ ॥
हिमासहो यस्य[33] मयस्तमिश्रहिंस्रः सहस्रांशुरिमौ[34] समेतौ ।
मत्वेव ते भीतिखती प्रविष्टे छायाविशिष्टं वनदुर्गमेतत् ॥ ४६ ॥

---

[23] शुद्धमूर्ति B, A, C. [24] अनर्च A. [25] दयाश्रयास्ताम् A.
[26] नोद्दीपितदासदृप्ते A ; नोद्दीपितदासदृप्ते C, B. [27] मही A, B.
[28] भ्रमत्घटीसधटीतरारघट्ट A, भ्रमत्घटीसंघटीतरघट्ट B. [29] प्रतिगर्जतावा A, B ; प्रतिगर्जतावा C. [30] दीर्घे B ; दीर्घैनि° A ; दिनैमनोभू C, B, A.
[31] पिकांगनां B, A, C. [32] मल्लमुकुला° A.
[33] (?) हिमासहोयं समयस्तमिश्र. [34] °रिभौ B.

Digitized by Google

लीलावनेस्मिन्नवमेघलीलामरन्दबिन्दुप्रकिरं किरन्तः ।
विनापि वर्षासमयेन हर्षं शिखण्डिनां ताण्डवयन्ति वृक्षाः ॥ ४७ ॥
स एव घर्मांशुकरानुषङ्गादङ्गानि पुंसां पवनो दुनोति ।
धिनोति सद्वृक्षवनोपसेवी सङ्गः कुलीनैरत एव युक्तः ॥ ४८ ॥
प्रकल्पितायां क्षितिकल्पवृक्षो द्राक्षालतामण्डपवेदिकायाम् ।
कृतोपवेशः स चकार गोष्ठीमनिष्ठुरोक्तिप्रसरैः[35] कवीन्द्रैः ॥ ४९ ॥
केचित्कुलं भीतिनिराकुलस्य कृतावदानस्य परे च दानम् ।
मान्यत्वमन्ये[36] विनिवृत्तमन्योर्व्याचख्युराख्येयगुणस्य तस्य ॥५०॥
कवीन्द्रशैलेन्द्रविनिर्गतानां सरस्वतीनां प्रसृतान्प्रवाहान् ।
आरुह्य भूमण्डलमासमुद्रमियर्ति मन्त्रीश्वरकीर्तिहंसी ॥ ५१ ॥
कवीश्वराणां पृणति स्म वाणी कर्णद्वयं कर्णसमस्य तस्य ।
सोपि प्रमोदं हृदयेषु तेषामुदारपाणी रचयांचकार ॥ ५२ ॥
दत्ते स्म तेभ्यः सचिवः कविभ्यः प्रभूतमत्यद्भुतकीर्तिरर्थम् ।
आदत्त चिद्रूपतया निगूढमप्यर्थलेशं तु तदीयसूक्तात्[37] ॥ ५३ ॥
मनीषिणां मानसमन्दिरेषु श्रीमानमात्यो निवसन्नजस्रम् ।
तेभ्यः सकूप्यं वितरत्यगण्यहिरण्य[38] विभ्राणनकैतवेन ॥ ५४ ॥
तस्मिन्वने सत्कविवक्त्रयन्त्रविनिर्गतेन श्रवणामृतेन ।
संसिच्यमानः सचिवप्रधानमह्नाय मध्याह्नमयं निनाय ॥ ५५ ॥

आशाथामशिशीरधामि पश्चिमाया-
मायाते सुकृतवतामपश्चिमोसौ ।
तान्कृत्वा धनकनकैः कवीन्कृतार्था-
नावासं स्वमभिचचाल वस्तुपालः ॥ ५६ ॥

इति गूर्जरेश्वरश्रीसोमेश्वरविरचिते कीर्तिकौमुदीनाम्नि महाकाव्ये पुरप्रमोदवर्णनो नाम षष्ठः सर्गः ॥ ६ ॥

[35] °गोष्टि° B; °गोष्टि°. A.
[36] मान्यत्वमन्यविनि° B, A, C.
[37] सूक्तान् A, B, C.
[38] हरिण्य B, A, C.

Digitized by Google

चन्द्रोदयवर्णनम् ।

अथोदयति निर्दोषसचिवेन्दौ नवे रवेः ।
कोककोकनदानन्दि[1] मन्दिमानमगान्महः ॥ १ ॥
गम्यः सोपि जगच्चक्षुश्चक्षुषां[2] समपद्यत ।
कः कालवलनेनात्र निस्तेजा न हि जायते ॥ २ ॥
लौहित्यं विद्रुमालीषु द्रुमालीपल्लवेषु च ।
अधिकं निदधे ब्रध्नः किरणैः कुङ्कुमारुणैः ॥ ३ ॥
शुशुभे दिक्षु सर्वासु प्रज्वलत्तपनोपलः ।
शिरस्थरविरस्ताद्रिः पञ्चाग्नित्रतवानिव ॥ ४ ॥
वियोगव्यथया वीक्ष्य साक्रन्दां चक्रकामिनीम् ।
प्रम्लाना [3]सह संवासस्नेहेनेव सरोजिनी ॥ ५ ॥
मित्रेस्तमागते दुःखादब्जैः प्राणाञ्जिहासुभिः ।
शालिग्रामशिलेवालिव्याजादारोपिता हृदि ॥ ६ ॥
न मित्रमन्तरेणापि क्षणमभ्यास वासरः ।
भवत्यव्यभिचार्येव संगतं गतदोषयोः ॥ ७ ॥
प्रतापः प्राप मन्दत्वं वारुणीसेवया रवेः ।
भवेत्प्रभावभङ्गाय महतोपि हि दुःकृतम् ॥ ८ ॥
निश्चला कस्य वान्यस्य भुवने श्रीर्भविष्यति ।
आसीद्वसुविहीनोसौ[4] यदह्नामपि नायकः ॥ ९ ॥
अपि तादृशमस्ताद्रिर्दिनेशं निरकाशयत् ।
चिरं न ह्याश्रयः क्वापि प्राप्यते दिवसात्यये ॥ १० ॥

---

[1] निशानन्दि B, C.
[2] जगच्चक्षुषां स° B, C.
[3] सहसंवास° B.
[4] °द्वसु B, A.

Digitized by Google

कुलायमाकुलाः सर्वे पक्षिणस्तत्क्षणादयुः ।
कस्त्यजत्यथवा[5] पस्त्यं सत्यां सवितुरापदि ॥ ११ ॥

वनान्ताङ्गलमानेन कुलेनोद्गमितैर्गवाम् ।
पांसुभिर्मांसलीभूतं कुतोप्याविरभूत्तमः ॥ १२ ॥

समन्ततोपि काष्ठानां प्लुष्टानां चित्रभानुना ।
धूमेनेव तमिस्रेण प्रसन्ने गगनाङ्गणे ॥ १३ ॥

मुक्त्वा निःश्रीकमप्यब्जं मराली न गतान्यतः ।
भ्रमराली त्वगाद्वेगादिदं सदसदन्तरम् ॥ १४ ॥

त्रैलोक्यदीपके देवे लोकान्तरमुपेयुषि ।
तमस्तान्तमभूद्विश्वं कः सुखी महदापदि ॥ १५ ॥

गते भानौ स्थिते ध्वान्ते पद्मिन्या साधु मीडितम् ।
दुरीक्षा महतामापदसतामुन्नतिश्च[6] यत् ॥ १६ ॥

स्थित्वाथ प्रस्थिता[7] संध्या व्रजद्वाजिव्रजाकुला ।
आक्रामतः[8] परं लोकं रवेः पश्चाच्चमूरिव[9] ॥ १७ ॥

ससंध्यावासरं सूर्यं मत्त्वा देशान्तरं गतम् ।
जायानुजान्वितं राममिव म्लानमभूज्जगत् ॥ १८ ॥

क्व गतः सविता ध्वान्तमेतदप्यागतं कुतः ।
एवं सविस्मयेव[10] द्यौः स्फारतारमवैक्षत ॥ १९ ॥

दीपिका अपि दीप्यन्तां स्फुरन्तु तिमिराण्यपि ।
तद्गतं[11] हि सजातीयविजातीयासहं महः ॥ २० ॥

---

[5] कस्त्यजत्यथवा यस्य A, B, C.
[6] महतामोप A, B, C.
[7] प्रम्लिता संघा. A, B, C.
[8] आक्रमिता A.
[9] चभूरिव B.
[10] सविस्मयेत C.
[11] तद्गहिं सजातीय° B, A.

Digitized by Google

स्रष्टुः सृष्टिर्विचित्रेयं[12] यस्मात्संकेतवर्त्मना ।
प्रियानभिसरन्तीनां[13] प्रकाशकमभूत्तमः ॥ २१ ॥
प्रदोषानन्तरं चन्द्रोदयादर्वाग्मृगीदृशाम् ।
मुहूर्तमभिसाराय मारमौहूर्तिकोब्रवीत् ॥ २२ ॥
सुरतव्रतचर्यायै पर्यङ्कादपि सज्जितात् ।
पांशुलानामभूत्पांशुतल्पतीर्थं यवाधिकम् ॥ २३ ॥
नीरन्ध्रेणान्धकारेण रोदसी संपुटीकृते ।
अधोऽटयितुं कोपि प्रवृत्त इव पूर्वतः ॥ २४ ॥
रचितोपक्रमे राज्ञि चक्रमाक्रमितुं दिशाम् ।
प्रभादम्भेन नासीरमाविरासीत्पुरः स्फुरत्[14] ॥ २५ ॥
रोहिणीरमणं वीक्ष्य रागादागतमन्तिके ।
सस्मितेव तदुद्योतदम्भादभवदिन्द्रदिक् ॥ २६ ॥
अथोज्जगाम सामन्तः कुसुमास्त्रमहीपतेः ।
शृंगारस्य जयोद्गारबन्दी कुमुदबान्धवः ॥ २७ ॥
आविर्बभूव पूर्वस्मादद्रेश्चन्द्रः शनैः शनैः ।
तदीयैस्तटमाणिक्यकिरणौघैरिवारुणः[15] ॥ २८ ॥
चकार तारिकारोचिरङ्कुरोत्करकैतवात् ।
करस्पर्शेन रागिण्याः सोमोरोमोद्गमं दिवः ॥ २९ ॥
पुंश्चलीनां तपश्छिद्रं समुद्रस्य महोत्सवः ।
रससिद्धिरनङ्गस्य दिवमिन्दुरगादगात् ॥ ३० ॥
मालिन्यं मार्जयामास चन्द्रमास्तिमिरैः कृतम् ।
खलैर्दत्तं मृषादोषमिव सत्पुरुषः सताम् ॥ ३१ ॥

---

[12] स्रष्टिवि° A, B, C.
[13] प्रियांमभि° B, A, C.
[14] °सीसुरस्फु° C.
[15] °किरणोघै B, A, C.

Digitized by Google

व्योमाङ्गणविकीर्णानि तमांसि तुहिनद्युतिः ।
ममार्ज रुचिमार्जन्या कुलटाकुलकण्टकः ॥ ३२ ॥
न मृगाङ्के कलङ्कोयं कस्तूरीतिलकाकृतिः ।
निदग्धो नीलकण्ठेन तिष्ठत्येष झषध्वजः ॥ ३३ ॥
दिवि स्वर्वाहिनीहंसैर्दिक्षु दन्तैश्च दन्तिनाम् ।
मेदुराजनि मेदिन्यां कौमुदी कौमुदैर्वनैः ॥ ३४ ॥
कणेहत्य चकोरीणां गणः पीत्वा सुधारसम्[16] ।
अजायत मदेनेव गुञ्जापुञ्जारुणेक्षणः ॥ ३५ ॥
मरीचिनिचये सान्द्रे सति सान्द्रे समन्ततः ।
घटितं विष्टपं दन्तसंतत्या दन्तिनामिव[17] ॥ ३६ ॥
शान्तध्वान्तघनस्तोमे कौमुदीशरदागमे ।
हृदि श्यामोन्यतः श्वेतश्चकाशे चन्द्रखञ्जनः ॥ ३७ ॥
चन्दनैश्चर्चितेव द्यौर्दिशः काशैरिव श्रिताः[18] ।
क्षीरेण क्षालितेवोर्वी शर्वरीशे विराजति ॥ ३८ ॥
पीयूषपायसैः प्रीतं चकोरद्विजसंचयम् ।
श्रेयोर्थं मन्मथस्येव चकार शिशिरद्युतिः ॥ ३९ ॥
संदोहैरिन्दुकान्तानां तदासंभवदम्भसाम् ।
प्रीतये चैत्रमित्रस्य चन्द्रश्चक्रे प्रपा इति ॥ ४० ॥
तरुणे तारकाध्यक्षे वृक्षच्छाया विरेजिरे ।
तमसः खण्ड्यमानस्य प्रतीकाः पतिता इव ॥ ४१ ॥
रमयत्यखिलामुर्वीमचण्डद्युतिमण्डले ।
कन्दर्पनृपते राज्यमेकच्छत्रमिवाभवत् ॥ ४२ ॥

---

[16] सुधासवं B; सुधारसः A, C.
[17] सन्तस्यादन्ति° B.
[18] श्रिता B, A, C.

Digitized by Google

सान्द्रे चन्द्रातपे तत्र स्फुरद्भिः कैरवाकरैः ।
क्षीरनीरधिडिण्डीरपिण्डानां पाण्डिमा जितः ॥ ४३ ॥
नीलाब्जमधुमत्तालिकुलकोलाहलैरिव ।
मानसे मदिराक्षीणां प्रबुद्धः कुसुमायुधः ॥ ४४ ॥
अनल्पाक्षीभिराकल्पास्तेनिरे तदनन्तरम् ।
विजिगीषोरनङ्गस्य संनाहाः[19] सुभटैरिव ॥ ४५ ॥
ज्योत्स्नाजलनिमग्नायाः कस्याश्चित्कुञ्चितभ्रुवः ।
शरीरे चन्दनं पौरैः[20] सौरभ्यादन्वमीयत ॥ ४६ ॥
सर्वत्र व्यक्तशक्तीनां तुषारद्युतिरोचिषाम् ।
जगाम वामनेत्राणां केशपक्षो विपक्षताम् ॥ ४७ ॥
विधृता विश्ववन्द्येन श्रीशिवेनापि[21] मूर्धनि ।
सा ज्योत्स्ना सुदृशां केशहस्तेन गलहस्तिता ॥ ४८ ॥
लग्नः पादेषु कान्तानां नखान्तं प्रतिमामिषात् ।
याचितुं[22] वक्त्रलावण्यकणिकामिव चन्द्रमाः ॥ ४९ ॥
कबरी कैरवाक्षीणां कबरा केतकीदलैः ।
हसन्तीव व्यभादाभां विलक्षामेणलक्ष्मणः ॥ ५० ॥
यामिन्यामिन्दुशुक्लायां शुक्लवस्त्रावगुण्ठनाः ।
धम्मिल्लोद्भावितं विघ्नं विजघ्नुरभिसारिकाः ॥ ५१ ॥
वधूनां वक्त्रमाविद्धं रत्नकुण्डलकान्तिभिः ।
प्रियेषु सविलम्बेषु रोषारुणमिव व्यभात् ॥ ५२ ॥
ताडपत्रश्रिया न्यस्तनीलाश्मगणवर्णया ।
पुस्तिकेव चकास्ति स्म काचित्कामविपश्चितः ॥ ५३ ॥

---

[19] सुनाहाः B, A, C.
[20] चन्दनपौरै and अत्वमीयत B, A.
[21] याशिवेनापि C.
[22] यावितु B, A.

Digitized by Google

कुचौ सुवृत्तौ धृतहारयष्टी[23] सकञ्चुकौ रेजतुरम्बुजाक्ष्याः[24] ।
रतेः स्थिताया हृदि रक्षणाय स्मरप्रयुक्ताविव सौविदल्लौ ॥ ५४ ॥
आकल्पिता शोभितकेलिशय्या नियुद्धभूमीव वधूवरस्य ।
तत्रोपधानच्छलतो बभूव निवेशवेदी स्मरपार्थिवस्य ॥ ५५ ॥
एकावली वक्षसि विस्फुरन्ती रराज राजीवविलोचनायाः ।
चेतःशरव्यावधिबोधहेतुर्लेखाखटिन्येव कृता स्मरेण ॥ ५६ ॥
दीपप्रभापिञ्जरितानि रेजुरल्पोदरीणां रतमन्दिराणि ।
आपूर्य चित्तान्यतिरिच्यमानैः प्रियानुरागैरिव पूरितानि ॥ ५७ ॥
कुरङ्गनाभीकृतपत्रभङ्गी[26] कुचद्वयी चारुदृशश्चकाशे ।
सुप्तोत्थितस्य स्मरकुञ्जरस्य मदाम्बुसिक्ता शयनस्थलीव ॥ ५८ ॥
माणिक्यमुक्ताफलकाञ्चनानां काचिन्मरीचिप्रचयार्चिताङ्गी ।
खरांशुशीतांशुहुताशनानां महःसमूहैः पिहितेव रेजे ॥ ५९ ॥
ताम्बूलवस्त्राभरणप्रसूनश्रीखण्डसंस्कारसमाकुलाभिः ।
सुलोचनानां परिचारिकाभिरसूच्यत[27] श्रीतनयोत्सवश्रीः ॥ ६० ॥
नवं वयश्चित्तमपेतचिन्तमिद्धः[28] सुधांशुर्मधुरा परिस्रुत् ।
सख्योनुकूलाश्च[29] विलासिनीनां खिदे तदा[30] कान्तविलम्ब एव ॥ ६१ ॥
अनिच्छतीनां निजमानभङ्गं संगं प्रियैः सत्वरमिच्छतीनाम् ।
अथेङ्गितज्ञस्य मनस्विनीनां दूतीजनस्यावसरो बभूव ॥ ६२ ॥
विज्ञानपूर्वः[31] सितरोचिरेषः कृतव्यलीकैः[32] सह कामुकैर्यः[33] ।
लुप्ते[34] प्रकोपेथ विसर्जनीये संधिं विधत्ते स्म वधूजनस्य ॥ ६३ ॥
विभिन्नयोरद्रि रुषा रजन्यामुदञ्चदुच्चैरनुतापयोश्च ।
स्त्रीपुंसयोः संगमनच्छलेन प्राणप्रदा कापि बभूव भूयः ॥ ६४ ॥

---

[23] धृतहारयष्टिसा° B. [24] °रम्बुजाक्षः A. [25] चिश्राव्य° B, A, C.
[26] भङ्गि° C. [27] °काभिः सूच्यत B, A. [28] °मपेतचित्तं B, A.
[29] सख्योनुकूलाश्च A. [30] खिदेंतदा B, A. [31] विज्ञा° A.
[32] व्यलिकैः B. [33] कार्मुकै° B, A, C. [34] लुप्ते B, A, C.

Digitized by Google

मानार्गलां[35] कापि विलंघ्य वेश्म गन्तुं प्रवृत्ता[36] दयितस्य यावत्।
तावत्स एव स्वयमाजगाम कामः[37] किमिष्टं न करोति तुष्टः॥ ६५॥
विलासवेश्माङ्गणमागतेषु कृतापराधेष्वपि वल्लभेषु।
मनस्विनीनामथमानमुद्रां भ्रूभङ्गशेषामकरोदनङ्गः॥ ६६॥
निःकाश्य कामः प्रसभं प्रकोपं पुनः प्रवेशं प्रतिषेद्धुमस्य।
अङ्गानि सारङ्गविलोचनानां चक्रे स्फुटं कण्टकवेष्टितानि॥ ६७॥
किं नेत्रमार्गेण मनोज्ञरूपा कर्णाध्वना वा मधुरं नदन्ती।
नासापथेनाथ सपुष्पवासा प्रियस्य चित्ते प्रविवेश काचित्॥ ६८॥
अगस्तिभिः संव्यवहार्यतां[38] गतैरनुज्ञयेव द्विजचक्रवर्तिनः।
कान्तैः समं कान्तविलोचनाजनः परिस्रुतं पातुमथोपचक्रमे॥ ६९॥
कन्दर्पकेलिप्रथमप्रयोगसंजातलज्जामुकुलीकृतानि।
तदामदेन प्रकटीबभूवुर्भुग्नभ्रुवां[39] विभ्रमचेष्टितानि॥ ७०॥
आसाद्य कन्दर्पगुरूपदेशान्मद्यं महानन्दमिवाङ्गनाभिः।
व्यावृत्तवस्त्वन्तरवासनाभिः कृता किरीटेपि पतत्युपेक्षा॥ ७१॥
महाकुलानि प्रमदाकुलानि विरेजुरापानगृहाङ्गणेषु।
हृदि [40]प्रविष्टस्मरचित्रपुत्रदुःखादिवोद्भूर्णितमस्तकानि॥ ७२॥
अधरैरधरीकृतं वधूनां मधुमाधुर्यमवैमि विद्रुमाभैः[41]।
दयितैरत एव तेषु पानप्रतिपत्तिर्विहिता विहाय हालाम्॥ ७३॥
परिजनैः प्रथमं गतमन्तिकादपसृतं वसनैर्जघनादथ।
तदनु यातमथ त्रपया हृदः स्थितमिहात्मभुवैव नतभ्रुवाम्॥ ७४॥
आलिङ्गितायाः सुभगेन गाढमुदूढरम्भादलमार्दवेभ्यः[42]।
स्वेदोदबिन्दुच्छलतोपरस्याः सुस्राव लावण्यमिवाङ्गकेभ्यः॥ ७५॥

[35] मानर्गलां B, A, C. [36] मतुप्रवृत्ता B; मंतुप्रवृत्ता A, [37] कामःकमि° B.
[38] °र्थतांगै° B. [39] °बभूवभु° B, A, C. [40] प्रविष्टः C.
[41] विद्रुमाभिः B, A, C. [42] उदूढु° C,

Digitized by Google

सकलमपि वपुर्विभिद्यमानं मदनशरैरवलोक्य कामिनीनाम् ।
शरणमिव रदच्छदः प्रपेदे प्रियवदनं यदलं प्रसह्य पातुम् ॥ ७६ ॥
मैरेयपानच्युतचेतनानां तासामसाधारणविभ्रमाणाम्[43] ।
नखाङ्कुशैरप्यनवाप्यसंज्ञो गम्भीरवेदी मदनद्विपोभूत् ॥ ७७ ॥
आहातुं कुसुमशरं पुरोनुवाक्या
दोर्वल्लीवलयरवोभवद्वधूनाम्[44] ।
तद्याज्यामणितमभूच्च मोहनाग्नि-
ष्टोमेस्मिन्मधुमधुराधरोष्ठसोमे ॥ ७८ ॥
निगदितुं विधिनापि न शक्यते सुभटता कुचयोः कुटिलभ्रुवाम् ।
सुरतसंयति यौ प्रियपीडितावपि नतिं न गतौ च्युतकञ्चुकौ ॥ ७९ ॥
उपरतसुरतश्रमः स्त्रियामासमयविराममनोरमैर्मरुद्भिः ।
सरसनखपदे हृदि प्रियाणामथ शयितः कृशमध्यमासमाजः[45]॥ ८० ॥
अवनमदमृतांशुबिम्बमौलिर्गलितवया इव शर्वरी व्यराजत् ।
अभजत ककुभं च जम्भजेतुर्जतुरसरक्त इव प्रभाप्रवाहः ॥ ८१ ॥
यातः शीतरुचिः प्रतीचिजलधौ डिण्डीरपिण्डच्छवि-
र्जृम्भारम्भमनोरमाकमलिनी सुप्तोत्थितेवाभवत् ।
वक्रत्वं च विधिर्विधूय सदयं चक्रेषु चक्रे मनः[46]
सौरेणाजनि कुङ्कुमारुणमिव प्राचीमुखं रोचिषा ॥ ८२ ॥
देवोयं भुवनत्रयैकनयनं प्राप्तः प्रभाणां प्रभुः
कर्ता यः कमलोदयं जगदिदं मोहाम्बुधेरुद्धरन् ।
प्रातस्त्यः समयो वयोविरुतिभिर्व्योमेति वर्द्धापय-
न्नाचिच्छेद तदीयमन्धतमसव्याजेन संव्यानकम् ॥ ८३ ॥

इति गूर्जरेश्वरपुरोहितश्रीसोमेश्वरदेवविरचिते कीर्तिकौमुदीनाम्नि महाकाव्ये चन्द्रोदयवर्णनोनाम सप्तमः सर्गः ॥ ७ ॥

[43] विभ्रमाङ्गो B, A, C. [44] वाक्याह्वो° B. [45] कृतमध्यमा°A. [46] सदयं चक्रे मनः B.

Digitized by Google

परमार्थविचारः ।

अथ पाथोजिनीनाथे चुम्बत्याशां बिडौजसः ।
प्रबुद्धं पङ्कजेनेव श्रियः पात्रेण[1] मन्त्रिणा ॥ १ ॥
कोकद्वन्द्वं तदालोक्य संगतं संममाद सः ।
परकष्टे प्रनष्टे[2] हि सतां प्रीतिः प्रचीयते ॥ २ ॥
उन्मादं वीक्ष्य पद्मानां कुमुदानां च मन्दताम् ।
क्षणिकत्वं विभूतीनां चेतसा निश्चिकाय सः ॥ ३ ॥
कदाप्युदयति ध्वान्तं कदाप्यर्कश्च धिग्विधिम् ।
तुल्यं नीचेप्यनीचेपि स तदेति व्यतर्कयत् ॥ ४ ॥
करं चिक्षेप तीक्ष्णांशुर्दुस्तरे तिमिराम्बुधौ ।
प्रदातुमिव मग्नस्य भुवनस्यावलम्बनम् ॥ ५ ॥
विच्छायास्तिमिरे[3] तुच्छे रेजुर्दीपाश्चलच्छिखाः ॥
पङ्कीभूते[4] पयःशेषे स्फुरन्तः शफरा इव ॥ ६ ॥
तीक्ष्णैः सपदि भिन्दानः कराग्रैस्तिमिरासुरम् ।
रोषेणेवारुणः पूषा प्रादुरासीन्नृसिंहवत् ॥ ७ ॥
अथो (ज्ज) जगाम वामत्वं कुमुदेषु प्रदर्शयन् ।
विष्टपव्यवहारैकप्राड्विवाको दिवाकरः ॥ ८ ॥
मलिनीभवदाशान्ते शान्ते ध्वान्तघनोदये ।
अब्जावतंसितं हंसो नभः कासारमासदत् ॥ ९ ॥
न्यासीकृताः[5] परं देशं गच्छता भास्करेण याः ।
स्फुटं स्फटिकभूर्वह्निः[6] प्रतिदत्ते स्म ता विभाः[7] ॥ १० ॥

[1] प्रायेण A.
[2] विनष्टे C.
[3] विछया A; विछाया° B, C.
[4] एकांभूते B, C, A.
[5] न्यासाकृता B, C, A.
[6] स्फुटिक B, C, A.
[7] तां विभोः B, A, C.

Digitized by Google

विवृतिर्विश्वसूत्रस्य[8] दृशां निस्तिमिरौषधी ।
इष्टवार्ता[9] च पद्मानां दिद्युते द्युमणिद्युतिः ॥ ११ ॥
चकोरचक्रवालस्य पीतशीतज्वरोदयाः ।
तमश्चक्रमधश्चक्रुश्चण्डरोचिर्मरीचयः ॥ १२ ॥
प्रसारितकरे सूरसिंधुरेन्द्रेनुधावति ।
सुमेरुं परिबभ्राम तमस्तोमः पुरःसरः ॥ १३ ॥
कुर्वाणः किरणाङ्कूरैरवतंसश्रियं[10] दिशाम् ।
नभस्त्रिभागमागच्छदब्जिनीजीवितं विभुः ॥ १४ ॥
विलोललोचनाः प्रातर्मौलिमाल्यानि तत्यजुः ।
लोके हि कारणेनैव गौरवं गुणिनामपि ॥ १५ ॥
हृदि प्रियवियुक्तानां साञ्जना बाष्पबिन्दवः ।
मग्नानां मारबाणानां पुङ्खा इव विरेजिरे ॥ १६ ॥
बभ्राजे भुजगाभासं त्रासयंस्तिमिरोत्करम्[11] ।
सुवर्णरुचिराकारः सुपर्ण इव[12] भास्करः ॥ १७ ॥
अथ धर्मैकनिष्णातो निस्नातः शुचिभिर्जलैः ।
वस्तुपालस्त्रिकालज्ञं जगत्पूज्यमपूजयत् ॥ १८ ॥
वलक्षेणोत्तरीयेण स बभौ बुद्धिमत्तरः ।
तुरीययुगभीतेन सुकृतेनेव संश्रितः ॥ १९ ॥
मत्सरज्वरसंतप्तं मन्ये मुक्त्वान्यमानसम् ।
आदिनाथः स्थितस्तस्य हृदि सौहार्दशीतले ॥ २० ॥
भाले तस्य विभाति स्म चान्दनी तिलकाकृतिः ।
कृता सुकृतिनां मध्ये रेखा मुख्येव वेधसा ॥ २१ ॥

---

[8] विवृत्ति C. [9] °वार्ता A, C. [10] °रवतमंस° B.
[11] त्रासयस्तिमिरोत्कराम् B, A, C. [12] सुवर्ण इव B, A.

Digitized by Google

आलिङ्गितः शमेनेव पृथग्भूतः कलेरिव ।
सद्वृत्तेनेव निर्वृत्तः स तदा शुशुभे भृशम् ॥ २२ ॥
देवेन्द्रं स्तुवतस्तस्य रेजुर्दशनदीप्तयः ।
तत्कालोन्मीलितानन्दसुधांशुकिरणश्रियः ॥ २३ ॥
दत्त्वा दानानि पात्रेभ्यो नत्वा गुरुजनं च सः ।
सत्त्वाश्रितेन चित्तेन भवं भावितवानिति ॥ २४ ॥
अहो संसारकारान्तर्मायानिगडितात्मनाम् ।
जायते जातु जन्तूनां[13] न कथंचन निर्वृतिः[14] ॥ २५ ॥
मोदमानोन्तरात्मैव साक्षी यत्कर्मशर्मणे ।
तमप्युपेक्षते धर्ममहो मूढमना जनः[15] ॥ २६ ॥
केचिद्द्युम्नाय धावन्ति प्रद्युम्नाय च केचन ।
नोद्युङ्क्ते कोपि धर्माय सर्वाभिप्रेतहेतवे ॥ २७ ॥
यस्मिन्सन्निहिते वह्निविषाद्याः प्रभवन्ति न ।
धर्मादप्यपरस्तस्मात्कः शरण्यः शरीरिणाम् ॥ २८ ॥
धर्मसिद्धौ ध्रुवा सिद्धिर्द्युम्नप्रद्युम्नयोरपि ।
दुग्धोपलम्भे सुलभा[16] संपत्तिर्देधिसर्पिषोः ॥ २९ ॥
उच्चैर्गर्वे[17] समारोप्य नरं श्रीराशु नश्यति ।
दौस्थ्यदत्तावलम्बोधः स तस्मादवरोहति ॥ ३० ॥
जितं लक्ष्मि त्वया यस्यै जनस्तमपि सेवते ।
धनं निकारपूर्वं यः प्रदत्ते प्रेतनाथवत् ॥ ३१ ॥
धनस्याधर्मलब्धस्य मुग्धोलाभेन तुष्यति ।
सुकृतस्य दुरापस्य न तु हानिमपेक्षते ॥ ३२ ॥

[13] जायजन्तूनां B. [14] निर्वृतिम् B, C, A. [15] जनाः B, A.
[16] सुलम्भा B. [17] गर्वे A.

Digitized by Google

आसाद्यते यया स्वर्गः श्रिया सन्मार्गदत्तया ।
त्यक्त्वा तामप्यधर्मेण मूर्खाः क्रीडन्ति दुष्कृतिः ॥ ३३ ॥
स्वयमुत्पादितां लक्ष्मीं पुत्रीमिव मनीषिणः ।
दत्त्वा पात्राय तद्दानफलमेवोपभुञ्जते ॥ ३४ ॥
पित्राद्यैरुपभुक्ता या पुत्राद्यैरपि भोक्ष्यते[18] ।
कामयन्ते न तां सन्तो ग्रामवेश्यामिव[19] श्रियम् ॥ ३५ ॥
तस्करैर्वा दुराशैर्वा हृतं संसहते धनम् ।
कदर्यो नैव सत्कार्ये कल्पयत्यल्पमप्यदः ॥ ३६ ॥
अन्धा एव धनान्धाः स्युरिति सत्यं तथा हि ये ।
अन्योक्तेनाध्वना गच्छन्त्यन्यहस्तावलम्बिनः ॥ ३७ ॥
धनी धनात्यये जाते दूरं[20] दुःखेन दूयते ।
दीपहस्तः प्रदीपेस्ते तमसा बाध्यतेधिकम् ॥ ३८ ॥
आदावेव विकारं यः प्रदर्शयति देहिनाम् ।
भवोच्छेदैकभावेभ्यो विभवः स्वाद्यते स किम् ॥ ३९ ॥
न संसारस्य वैरस्यमिदं वेत्ति जडो जनः ।
यत्सुखं स सुखाभासो यद्दुःखं दुःखमेव तत् ॥ ४० ॥
रमयन्ति मनस्तावद्भावाः संसारसंभवाः ।
यावन्न श्रूयते साश्रुलोकफूत्कारकाहलः[21] ॥ ४१ ॥
अहो देहभृतां मोहः प्ररोहति महानयम् ।
यदेते सुखमिच्छन्ति विषयैर्दुःखहेतुभिः ॥ ४२ ॥
छत्रच्छायाच्छलेनामी धात्रा चक्रे निवेशिताः ।
भ्रमन्तोपि स्वमात्मानं मन्वते स्थिरमीश्वराः ॥ ४३ ॥

---

[18] °भुक्तायां B, A, C; पित्राद्यै° B, A, C; °रुपभोक्ष्य° B, A.
[19] ग्रामवेशामिव A. [20] दुरं B, A. [21] पूत्कारकाहला B, C, A.

Digitized by Google

मदान्धास्ते परं लोकं कथं पश्यन्तु भूभुजः।
तमोमण्डलमध्यस्थाश्छत्रच्छायाच्छलेन ये[22] ॥ ४४ ॥
सुखं विषयसेवेति सक्तास्तत्रैव जन्तवः।
यः प्रमोदस्तु[23] तत्त्यागात्तदास्वादः क्वचिद्यदि ॥ ४५ ॥
अवश्यं नश्वरे देहे दुर्दमे च यमे द्विषि।
हास्यं नास्याद्विनिर्याति[24] यत्पुंसामिदमद्भुतम् ॥ ४६ ॥
कालेन सौनिकेनेव[25] नीयमानो जनः पशुः।
क्षिप्त्येष धिगासन्ने मुखं[26] विषयशाद्वले ॥ ४७ ॥
कायः कर्मकरोयं[27] न तत्र कार्यातिलालना।
भृतिमात्रोचितो[28] ह्येष प्रपुष्टो विचिकीर्षते ॥ ४८ ॥
प्रयोजकान्यकार्येषु नश्यन्त्याशु महापदि।
दुर्मित्राणीव खान्येव[29] बन्धुबुद्धिरधीमताम् ॥ ४९ ॥
योयं जीवितभूतेषु स्नेहग्रन्थिः सुतादिषु।
विभवावसरे[30] पुंसां व्यक्तः सोपि भविष्यति ॥ ५० ॥
दुःखाग्निर्वा स्मराग्निर्वा क्रोधाग्निर्वा ज्वलन् हृदि।
न हन्त[31] शान्तिमायाति देहिनामविवेकिनाम् ॥ ५१ ॥
अविद्यामेव सेवन्ते हन्त विद्यां व्युदस्य ते[32]।
ते दूत्यामनुरज्यन्ते वरारोहाविहायिनः ॥ ५२ ॥
तटस्थः प्रेक्षते योगी जगदस्मिन्भवार्णवे।
मज्जनोन्मज्जने[33] कुर्वद्दुःकृतैः सुकृतैर्निजैः ॥ ५३ ॥

---

[22] तमे° B, A. °ध्यस्थाछत्र° B, A.
[23] प्रमोद तत्सागात् तदोस्वादः B.
[24] °द्विनिर्यास्ति B.
[25] शौनिके° B, A.
[26] शापं B, A.
[27] कमकरोयंत° B, A, C.
[28] मात्रोंचि° B, A.
[29] खान्येषु ?
[30] विभावा° B, A.
[31] हन्ति B, A.
[32] व्युदस्य ये.
[33] मज्जानोमज्जने कुर्वन् B, A, C.

Digitized by Google

विषयामिषमुत्सृज्य दण्डमादाय ये स्थिताः ।
संसारसारमेयोसौ बिभ्यत्तेभ्यः पलायते ॥ ५४ ॥
सत्यं संसृतिगर्तेयं दुःखैः पूर्णा निरन्तरम् ।
यतस्तद्व्यतिरेकेण नान्यत्किंचिदिहाप्यते ॥ ५५ ॥
विधौ विध्यति सक्रोधे वर्म धर्मः शरीरिणाम् ।
स एव केवलं तस्मादस्माकं जायतां गतिः ॥ ५६ ॥
सुचिरमिति[34] विचार्य पुण्यचर्यां विदुषि चिकीर्षति तत्र तीर्थयात्राम् ।
विदधदथ पयः प्रशान्तपङ्कमृतुरपनृत्तमयूरमण्डलोभूत्[35] ॥ ५७ ॥
भवमवरमिमं विमृश्य सम्यग्गलितरसैर्विषयेषु वारिवाहैः ।
मुनिभिरिव निबद्धमौनमुद्रैर्गगनवनं विमलात्मभिश्च भेजे[36] ॥ ५८ ॥
पतिरति तपति स्म वासराणामति शुभति स्म विभावरीभुजङ्गः ।
जलमति भजति स्म निर्मलत्वं मधुरमति ध्वनति स्म राजहंसी ॥५९॥
पुलिनपरिसरे[37] सरस्वतीनामजनि समागमनं सुखज्ञनानाम् ।
भवति यदवलोकनादनाविष्कृतहसितारिमुखं सुखं जनानाम् ॥६०॥
क्षितिवलयजयोज्झिहानवीरा क्रमविरमज्जलपूरसिन्धुतीरा ।
शरदवतरति स्म मत्तहंसा दिशि दिशि कासकदम्बकावतंसा ॥ ६१॥
कुटजविटपिनः प्रसूनशून्यानलिपटलं परिहृत्य सप्तपर्णैः ।
सममरमत दन्तिदानगन्धैर्जगति समृद्धमुपैति सर्व एव ॥ ६२ ॥
विगलितजगदापदः[38] पयोदाः परिगलिताम्बुविभूतयो बभूवुः ।
अहह न सहते महीयसामप्युदयमियं नियतिश्चिराय वैरा ॥ ६३ ॥
घनमयसमयात्ययेविनिद्रः क्रतुपुरुषो भवतीति तथ्यमेव ।
दधतुरपरथा कथं विकाशं दिनपतिरात्रिपती[39] तदीयनेत्रे ॥ ६४ ॥

---

[34] सुवीर° B. [35] °पङ्कभृत् B, A. [36] °त्मभिश्चजे B.
[37] °परिसरस्व° B. [38] विदलित°. [39] °पतिस्त° A.

Digitized by Google

सरसिजसुरभिः सरःसमीरः कमलसमृद्धिसमुद्धता[40] धरित्री ।
कलमपि कलहंसकामिनीनां रसितमथ व्यथयांचकार पान्थान् ॥६५॥

कलयति कलशोद्भवे प्रवेशं मलयनगस्थगिते नभोविभागे ।
जगदगदमभूत्पयश्च पेयं ननु महतामुदयो मुदे न कस्य[41] ॥ ६६ ॥

स्तनितमुपरतं पयोधराणां ध्वनिरजनिष्ट ककुभ्रतां विशिष्टः ।
परिहतमवनीतलं शिलिन्ध्रैर्जलमलमक्रियतारविन्दवृन्दैः ॥ ६७ ॥

गवलकुवलयप्रभैः पयोदैर्वियति वृते व्यथिते व्ययेन[42] यस्य ।
अधिपतिरतिमात्रमुष्णमह्नां[43] तदिव सुसंचितमुत्ससर्ज तेजः ॥६८॥

भासः सेव्याः श्वेतभासः[44]प्रदोषे लोकाह्लादोद्दीपिका दीपकाली ।
दुग्धैर्दिग्धा शर्करा यत्र पथ्यं दिष्ट्या दिष्टः सप्रविष्टः पृथिव्याम्॥६९॥

हंसानां नवनलिनीवनोत्सुकानामालापैरिव मुरजिन्मुमोच निद्राम् ।
जम्भारिस्त्रिभुवनभारमुत्थितेस्मिन्नारोप्य स्वधनुरथोपसंजहार ॥७०॥

स्वच्छं वारि निवारितामरधनुर्व्योम व्यपेताम्भसः
पाथोदाः समदाः सितच्छदवधूराशाः सकाशाः पुरः ।
भाति स्म प्रथयन्नहंप्रथमिकां[45] तेजस्विषूत्तेजितः
श्यामाम्भोधरभस्मनेव शशभृद्विक्कामिनीदर्पणः[46] ॥ ७१ ॥

इति श्रीगूर्जरेश्वरपुरोहितसोमेश्वरदेवविरचिते कीर्तिकौमुदीनाम्नि महाकाव्ये परमार्थविचारोष्टमः सर्गः ॥ ८ ॥

---

[40] समुद्भूता C.
[41] कस्याः B, A, C.
[42] व्यधितव्ययो न?
[43] °मुष्मणमह्नां A.
[44] °भासप्र° B, A, C.
[45] °हंप्रथिमा° B, A, C.
[46] शशिभृ° C.

Digitized by Google

यात्रासमागमनम् ।

चिकीर्षिता श्रीसचिवेन तीर्थयात्राथ सोयं शरदा समेतः[1] ।
महात्मनामीहितकार्यसिद्धौ विधिर्विधत्ते हि सदानुकूल्यम् ॥ १ ॥
धर्मैकमित्रोपनिबन्धनार्थं[2] तेनार्थिमित्रेण चराः प्रयुक्ताः ।
न केवलं स्वेन कृतार्थितेन परैः कृतार्थैः कृतिनः कृतार्थाः ॥ २ ॥
रथानथानन्दविसंष्ठुलोयं[3] लोकप्रयाणप्रवणांश्चकार ।
उपक्रमे पुण्यकृतां क्रियाणां राभस्यमभ्यस्यति को न साधुः ॥ ३ ॥
पाथेयवन्तः पथि योग्ययुग्याः सोपानहः सोदकभाजनाश्च ।
श्रीवस्तुपालेन समं जनौघाः प्रयाणकाय प्रवणा बभूवुः ॥ ४ ॥
आकारितस्तेन कृतादरेण दूरादपि श्राद्धजनः समेतः ।
ययुस्तदीयानि पुनर्यशांसि दिगन्तरेभ्योपि दिगन्तराणि ॥ ५ ॥
समं समग्रैररिबन्धुवर्गैर्निसर्गबन्धुर्विबुधव्रजस्य ।
शुभे मुहूर्तेथ शुभैर्निमित्तैर्मन्त्री स्वनाथानुमतः प्रतस्थे ॥ ६ ॥
पुरः प्रशस्तां फलपुष्पहस्तां प्रमोदमानः प्रमदां विलोक्य ।
निरन्तरायां पथि तीर्थयात्रां मन्त्रीश्वरश्चेतसि निश्चिकाय ॥ ७ ॥
स्थितः क्षणं क्षीरतरोरधस्तात्कृतानुवृत्तीन्सुजनान्निवर्त्य ।
स्वरस्य वामं स्वरमध्वगामी[4] शुश्राव उ श्रावकचक्रशक्रः ॥ ८ ॥
अक्षेषु नित्यं कृतनिग्रहोपि जग्राह तांस्तान्नियमानमात्यः ।
स्वभावशुद्धाः सुधियो हि तेषां पावित्र्यलाभाय तथापि लोभः ॥ ९ ॥
रथैस्तुरंगैः करभैर्महोक्षैर्जग्मुस्तदा केपि कथंचनापि ।
मन्त्रीश्वरे धर्मधराधुरीणे तस्मिन्विशश्राम भरस्तु तेषाम् ॥ १० ॥

[1] सोयंसमेतः B; सोयंसमेत A, C.
[2] B, A, C have मन्त्रिणार्थे in the first line in addition to the text.
[3] विसंस्थुलो° C.
[4] स्वरमध्यगामी B; A.

Digitized by Google

न वाहनं यस्य स तस्य यानं नासीद्धनं यस्य स तस्य वित्तम् ।
न चीवरं यस्य स तस्य वस्त्रं कल्पद्रुकल्पः प्रददौ पृथिव्याम् ॥११॥
भुङ्क्ते[5] स्म सर्वेष्वपि भुक्तवत्सु शेते स्म सुप्तेषु स यात्रिकेषु ।
प्रबुध्यते स्म प्रथमं तदित्थं संघप्रभुत्वं[6] व्रतमाचचार ॥ १२ ॥
प्रभूतभोज्यानि बहूदकानि सगोरसान्युन्मदमानवानि ।
तस्यातिदुर्गेपि पथिप्रयाणान्युद्यानलीलासदृशान्यभूवन् ॥ १३ ॥
यात्राप्रसङ्गेषु जगाम येषु पुरेषु पौरोच्छ्रिततोरणेषु ।
तेषामधीशैः सविशेषमेष संमान्यमानः सममानयत्तान् ॥ १४ ॥
अभ्यर्थ्यमानः पथिकैरनेकैर्वस्तून्यनेकान्यपि वस्तुपालः ।
तेभ्यः प्रभूतानि पथि प्रयच्छन्नाहंकरोति स्म न कुप्यति स्म ॥१५॥
गीतानि जैनान्युचितानि गातुं जनो जगौ वर्त्मनि मध्यमंध्ये ।
प्रमोदपूरोद्गतरोमराजिर्निरन्तरं तस्य पुनर्यशांसि ॥ १६ ॥
अनुक्रमेण प्रसृतास्य साधोः साधोरणिर्यात्रिकधोरणानाम् ।
वैमानिकैर्व्योमनि[8] नाकिलोकैर्भूमानयष्टिप्रतिमा व्यलोकि ॥ १७ ॥
पुरश्च पृष्ठेपि च पार्श्वयोश्च परिस्फुरन्तः खरहेतिहस्ताः ।
यात्राजनं वर्त्मनि तस्य शश्वदश्वाधिरूढाः सुभटा ररक्षुः ॥ १८ ॥
समुद्भृतैर्जीर्णजिनेन्द्रहर्म्यैर्नवैः[9] सरोभिश्च सरोजरम्यैः ।
प्रस्थानमार्गः[10] सचिवस्य सोभूदजानतामप्युपलक्षणीयः[11] ॥ ११ ॥
यावन्ति बिम्बानि जिनेश्वराणां श्वेताम्बराणां च कदम्बकानि ।
मार्गेषु तेषां मुषिताश्रितार्तिः पूजां स निर्वर्त्य ततः प्रतस्थे ॥ २० ॥
स पञ्चषैर्निर्विषयप्रपञ्चप्रयाणकैः प्रीणितभव्यलोकः ।
धराधरं धर्मधुरंधरः श्रीशत्रुंजयं शत्रुजयी जगाम ॥ २१ ॥

---

[5] भुङ्क्ष्वेषु C.
[6] सङ्घप्रभुत्वव्रत° C.
[7] °रिणी A, B, C.
[8] वैमानिकव्यो° B, A, C.
[9] समुतवृत्तै° B, C, A
[10] °मार्ग° B.
[11] °लक्षणीयम् B, A, C.

Digitized by Google

आरुह्य सद्यादपि सुन्दरेस्मिन्नद्रौ समुच्चये कश्मलमुक्तचेताः ।
मन्त्री मिलन्मर्त्यकृतोपमर्दं[12] कपर्दिनं नाम ननाम यक्षम्[13] ॥ २२ ॥

स कर्दमैस्तस्य तनुं कपर्दियक्षस्य यक्षोपपदैर्विलिप्य ।
पुष्पैरनेकैर्विलसद्विवेकस्त्रिलोकपूज्यस्य चकार पूजाम् ॥ २३ ॥

अध्वश्रमध्वस्तसमस्तपापभारेण भूरेणुभृता जनेन ।
शृङ्गावलिव्याप्तवियन्मुखोपि सोयं सुखेनारुरुहे महीन्द्रः ॥ २४ ॥

तत्रादिनाथस्य नमस्यमूर्तेः[14] स्नानं[15] च पूजां च विधाय मन्त्री ।
पुरः कुरङ्गीनयनाः प्रमोदनृत्यात्मना नृत्यमकारयत्सः[16] ॥ २५ ॥

संश्लिष्टमष्टापदपृष्ठपट्टे तं दृष्टवान्विष्टपवन्दनीयम् ।
अमेयतेजोमयमण्डलस्थं यथा पुमांसं परमं स मन्त्री ॥ २६ ॥

विरच्यमाने सचिवेन तेन पूजाविधौ पूज्यतमस्य तस्य[17] ।
सकुङ्कुमस्नानजलच्छलेन गलन्निवालोक्य[18] ततोङ्गरागम्[19] ॥ २७ ॥

न केवलं केवलिचक्रवर्ती द्यचक्रवर्ती सचिवस्य सोभूत् ।
शुश्रूषयाप्येष[20] विशेषवत्या तत्याज नान्तः करणं यदीयम् ॥ २८ ॥

श्रीनाभिसूनुर्मृगनाभिमुख्यैः पूजोपहारैः प्रचुरैः प्रसन्नः ।
मन्ये स्वभावादपि वीतरागः स स्फीतरागः[21] सचिवे बभूव ॥ २९ ॥

स श्वेतपीतैर्वसनैर्व्यधत्त धात्रि प्रभोस्तस्य महापताकाम्[22] ।
सरोजराजीरजसानुविद्धो जिग्ये यया सिद्धसरित्प्रवाहः ॥ ३० ॥

धर्माय निर्मापयति स्म तस्मिन्मन्त्री धरित्रीभृति वस्तुपालः ।
श्रीनेमिपार्श्वप्रभुहर्म्ययुग्ममयुग्मनेत्राचलशृङ्गचारु ॥ ३१ ॥

---

[12] °मीलन्म° B, C, A. [13] यक्षम् A. [14] नभस्य° B. [15] स्नात्रं B, A, C. [16] नृत्थी° B. [17] तस्या A. [18] गलन्मि° B. [19] लोक्यत सोङ्गरागः(?) [20] शुश्रुषया B, C, A. [21] फीतरागः B. [22] महापताकाः B, C, A.

Digitized by Google

प्रासादसौन्दर्यविलोकनेन[23] संभूतभूयस्तरसंमदानाम् ।
विभान्ति तत्कान्तिकरम्बितानि कृतस्मितानीव दिशां मुखानि ॥३२॥
यदुत्तमाङ्गस्थितशातकुम्भकुम्भध्वजस्फूर्जदभीशुभिन्नाः ।
अल्पेप्यनल्पा अपि वासरान्ते चिराद्विराजन्ति कराः खरांशोः ॥३३॥
कथं न विश्वैककुटुम्बकोसौ यस्त्यक्तभेदं घटयांचकार ।
यन्मण्डपे चण्डपपौत्रपौत्रः स्वपूर्वजानां सुहृदां च मूर्तीः[24] ॥३४॥
स्वस्यानुजस्यापि च मूर्तियुग्मं तुरङ्गयुग्मस्थमचीकरद्यः ।
मनीषिणां मुख्यतमोपि मन्ये वृषस्थमात्मानमयं न वेत्ति ॥३५॥
शैलोपकण्ठेयमकुण्ठबुद्धिः सरः सरस्वत्सदृशं चकार ।
उष्णेपि नोष्णानि भवन्ति यस्य वारीणि रीणागध्वजावितानि[25]॥३६॥
द्वित्राणि तत्रैव दिनानि नीत्वा क्रीत्वार्थदानैः सुकृतं यशश्च ।
कथं चिदापृच्छ्य तमीशमाद्यं माद्यन्नसौ रैवतकं जगाम ॥३७॥
तमुज्जयन्तापरसंज्ञि(ज्ञ)मद्रिमाज्ञाविधेयाखिलसंघलोकः ।
स विश्वमुच्चैरमृतेन सिञ्चन्नुपागमन्नव्य इवाम्बुवाहः ॥३८॥
तुरंगमाणां चरणाग्रघातैरुद्धूतधूलीपटलच्छलेन ।
तस्य प्रयाणे प्रणयिप्रियस्य नगोनुगच्छन्निव स व्यराजत् ॥३९॥
नरो न रोगापदमाप कोपि न क्वापि यानव्यसनं बभूव ।
कस्याप्यभूत्तत्सुकृतप्रभावान्न वस्तुनो हानिरहानि तानि ॥४०॥
सुखेन सार्थः पथि यात्रिकाणां सिन्धूरगाधा अपि तास्तार ।
संसारनामानमपारमब्धिं स तु स्वयं लङ्घयितुं प्रवृत्तः ॥४१॥
मनागनालोकितदुर्निमित्तः पदे पदे प्राज्यतृणोदकाद्यः ।
अहिंस्रजीवस्य बभूव तस्य मार्गः सुदुर्गोपि[26] किलानुकूलः ॥४२॥

[23] प्रसाद B, A, C. [24] मूर्ता B, C, A. [25] Evidently the text of the last line is wrong. It appears to have been corrupted from वारीणि रीणाद्युगवीजितानि. [26] सुदुर्गोपि C.

Digitized by Google

तीर्थैः समग्रैरुपचर्यमाणं[27] सिद्धैरनेकैरुपरुध्यमानम् ।
रत्नैरनन्तैरुपचीयमानं भूतैः प्रभूतैरुपजीव्यमानम्[28] ॥४३॥
गृध्रैरुदग्रैर्दिवमुल्लिखन्तं दिशः स्पृशन्तं पृथुभिश्च पादैः ।
यः कर्णेपि चकार न प्रलपतामुद्दिश्य यो मन्त्रिणौ ।
आभ्यामभ्युदयातिरेकरुचिरं राज्यं स्वभर्तुः कृतं
वाहानां निवहा घटाः करटिनां बद्धाश्च सौधाङ्गणे ॥ २८ ॥
तेन मन्त्रिद्वयेनायं जाने जानू (तू) पवर्तिना ।
विभुर्भुजद्वयेनैव सुखमाश्लिष्यति श्रियम् ॥ २९ ॥
गौरीवरश्वशुरभूधरसंभवोय-
मस्त्यर्बुदः ककुदमद्रिकदम्बकस्य ।
मन्दाकिनीं घनजटे दधदुत्तमाङ्गे
यः श्यालकः शशिभृतोभिनयं करोति ॥ ३० ॥
क्वचिदिह विहरन्तीर्वीक्षमाणस्य रामाः
प्रसरति रतिरन्तर्मोक्षमाकाङ्क्षतोपि ।
क्वचन मुनिभिरर्थ्या पश्यतस्तीर्थवीथिं
भवति भवविरक्ति (क्तौ) धीरधीरात्मनोपि ॥ ३१ ॥
श्रेयः श्रेष्ठवशिष्ठहोमहुतभुक्कुण्डान्मृतण्डात्मज-
प्रद्योताधिकदेहदीधितिभरः कोप्याविरासीन्नरः ।
तं मत्वा परमारणैकरसिकं स व्याजहार श्रुते-
राधारः परमार इत्यजनि तन्नामाथ तस्यान्वयः ॥ ३२ ॥
श्रीधूमराजः प्रथमं बभूव भूवासवस्तत्र नरेन्द्रवंशे ।
भूमीभृतो यः कृतवानभिज्ञान्पक्षद्वयोच्छेदनवेदनासु ॥ ३३ ॥

Digitized by Google

धन्धुकधुवभटादयस्ततस्ते रिपुहृदयघटाजितोभवन् ।
यत्कुलेजनि पुमान्मनोरमो रामदेव इति कामदेवजित् ॥ ३४ ॥
रोदःकन्दरवर्तिकीर्तिलहरीलिप्तामृतांशुद्युते-
रप्रद्युम्नवशो यशोधवल इत्यासीत्तनूजस्ततः ।
यश्चौलुक्यकुमारपालनृपतिप्रत्यर्थितामागतं
मत्वा सत्वरमेव मालवपतिं बद्धालमालम्बवान् ॥ ३५ ॥
शत्रुश्रेणीगलविदलनोन्निद्रनिस्त्रिंशधारो
धारावर्षः समजनि सुतस्तस्य विश्वप्रशस्यः ।
क्रोधाक्रान्तप्रधनवसुधानिश्चले यत्र जाता-
श्चोतन्नेत्रोत्पलजलकणाः कोङ्कणाधीशपत्न्यः ॥ ३६ ॥
सोयं पुनर्दाशरथिः पृथिव्यामव्याहतौजाः स्फुटमुज्जगाम ।
मारीचवैरादिव योधनोपि मृगव्यमव्यग्रमतिः करोति ॥ ३७ ॥
सामन्तसिंहसमितिक्षितिविक्षतौजाः
श्रीगूर्जरक्षितिपरक्षणदक्षिणासिः ।
प्रह्लादनस्तदनुजो दनुजोत्तमारि-
चारित्रमत्र पुनरुज्ज्वलयांचकार ॥ ३८ ॥
देवी सरोजासनसंभवा किं कामप्रदा किं सुरसौरभेयी ।
प्रह्लादनाकारधरा धरायामायातवत्येष न निश्चयो मे ॥ ३९ ॥
धारावर्षसुतोयं जयति श्रीसोमसिंहदेवो यः ।
पितृतः शौर्यं विद्यां पितृव्यतो ज्ञानमुभयतो जगृहे ॥ ४० ॥
मुक्ताविप्रकरानरातिनिकरान्निर्जित्य तत्किंचन
प्रापत्संप्रति सोमसिंहनृपतिः सोमप्रकाशं यशः ।
येनोर्वीतलमुज्ज्वलं रचयताप्युत्ताम्यतामीर्ष्यया
सर्वेषामिह विद्विषां न हि मुखान्मालिन्यमुन्मूलितम् ॥४१॥

Digitized by Google

वसुदेवस्येव सुतः श्रीकृष्णः कृष्णराजदेवोस्य ।
मात्राधिकप्रतापो यशोदयासंश्रितो जयति ॥ ४२ ॥

इतश्च

अन्वयेन विनयेन विद्यया विक्रमेण सुकृतक्रमेण च ।
क्वापि कोपि न पुमानुपैति मे वस्तुपालसदृशो दृशोः पथि ॥४३॥

दयिता ललितादेवी तनयमवीतनयमाप सचिवेन्द्रात् ।
नाम्ना जयन्तसिंहं जयन्तमिन्द्रात्पुलोमपुत्रीव ॥ ४४ ॥

यः शैशवे विनयवैरिणि बोधवन्ध्ये
धत्ते नयं च विनयं च गुणोदयं च ।
सोयं मनोभवपराभवजागरूक-
रूपो न कं मनसि चुम्बति जैत्रसिंहः ॥ ४५ ॥

श्रीवस्तुपालपुत्रः कल्पायुरयं जयन्तसिंहोस्तु ।
कामादधिकं रूपं निरूप्यते यस्य दानं च ॥ ४६ ॥

स श्रीतेजःपालः सचिवश्चिरकालमस्तु तेजस्वी ।
येन जना निश्चिन्ताश्चिन्तामणिनेव नन्दन्ति ॥ ४७ ॥

यच्चाणक्यामरगुरुमरुद्व्याधिशुक्रादिकानां
प्रागुत्पादं व्यधित भुवने मन्त्रिणां बुद्धिधाम्नाम् ।
चक्रेभ्यासः स खलु विधिना नूनमेनं विधातुं
तेजःपालः कथमितरथाधिक्यमापैष तेषु ॥ ४८ ॥

अस्ति स्वस्तिनिकेतनं तनुभृतां श्रीवस्तुपालानुज-
स्तेजःपाल इति स्थितिं बलिकृतामुर्वीस्थले पालयन् ।
आत्मीयं बहु मन्यते न हि गुणग्रामं च कामन्दकि-
श्चाणक्योपि चमत्करोति न हृदि प्रेक्षास्पदं प्रेक्ष्य यम् ॥ ४९ ॥

Digitized by Google

इतश्च महं श्रीतेजःपालस्य पत्न्याश्चानुपमदेव्याः पितृवंशवर्णनम् ।

प्राग्वाटान्वयमण्डनैकमुकुटः श्रीसान्द्रचन्द्रावती-
वास्तव्यः स्तवनीयकीर्तिलहरीप्रक्षालितक्ष्मातलः ।
श्री गागाभिधया सुधीरजनि यद्वृत्तानुरागादभू-
त्को नाम प्रमदेन दोलितशिरा नोद्भूतरोमा पुमान् ॥ ५० ॥

अनुसृतसज्जनसरणिर्धरणिगनामा बभूव तत्तनयः ।
स्वप्रभुहृदये गुणिना हारेणेव स्थितं येन ॥ ५१ ॥

त्रिभुवनदेवी तस्य त्रिभुवनविख्यातशीलसंपन्ना ।
दयिताभूदस्याः पुनरङ्गं द्वेधा मनस्त्वेकम् ॥ ५२ ॥

अनुपमदेवी देवी साक्षाल्लक्षायणीव शीलेन ।
तद्दुहिता सहिता श्रीतेजःपालेन पत्याभूत् ॥ ५३ ॥

इयमनुपमदेवी दिव्यवृत्तप्रसून-
व्रततिरजनि तेजःपालमन्त्रीशपत्नी ।
नयविनयविवेकौचित्यदाक्षिण्यदान-
प्रमुखगुणगणेन्दुद्योतिताशेषगोत्रा ॥ ५४ ॥

लावण्यसिंहस्तनयस्तयोरयं रयं जयन्निन्द्रियदुष्टवाजिनाम् ।
लब्ध्वापि मीनध्वजमङ्गलं वयः प्रयाति धर्मैकविधायिनाध्वना ॥५५॥

श्रीतेजपालतनयस्य गुणानमुष्य
श्रीलूणसिंहकृतिनः कति न स्तुवन्ति ।
श्रीबन्धनोद्धुरतरैरपि यैः समन्ता-
दुद्दामता त्रिजगति क्रियते स्म कीर्तिः ॥ ५६ ॥

गुणधननिधानकलशः प्रकटोयमवेष्टितश्च खलसर्पैः ।
उपचयमयते सततं सुजनैरुपजीव्यमानोपि ॥ ५७ ॥

Digitized by Google

मल्लदेवसचिवस्य नन्दनः पूर्णसिंह इति लीलुकासुतः ।
तस्य नन्दति सुतोयमल्हणादेविभूः सुकृतवेदम पेथडः ॥ ५८ ॥

अभूदनुपमा पत्नी तेजःपालस्य मन्त्रिणः ।
लावण्यसिंहनामायमायुष्मानेतयोः सतः ॥ ५९ ॥

तेजःपालेन पुण्यार्थं तस्य पुत्रकलत्रयोः ।
हर्म्यं श्रीनेमिनाथस्य तेने तेनेदमर्बुदे ॥ ६० ॥

तेजःपाल इति क्षितीन्द्रसचिवः शङ्खोज्ज्वलाभिः शिला-
श्रेणीभिः स्फुरदिन्दुकुन्दरुचिरं नेमिप्रभोर्मन्दिरम् ।
उच्चैर्मन्दिरमग्रतो जिनवरावासद्विपञ्चाशतं
तत्पार्श्वेषु बलानकं च पुरतो निष्पादयामासिवान् ॥ ६१ ॥

श्रीमच्चण्डपसंभवः समभवच्चण्डप्रसादस्ततः
सोमस्तत्प्रभवोश्वराज इति तत्पुत्राः पवित्राशयाः ।
श्रीमल्लूणिगमल्लदेवसचिवः श्रीवस्तुपालाह्वय-
स्तेजःपालसमन्विता जिनमतारामोच्चमञ्जीरदाः ॥ ६२ ॥

श्रीमन्त्रीश्वरवस्तुपालतनयः श्रीजैत्रसिंहाह्वय-
स्तेजःपालसुतश्च विश्रुतमतिर्लावण्यसिंहाभिधः ।
एतेषां दश मूर्तयः करिवधूस्कन्धाधिरूढाश्चिरं
राजन्ते जिनदर्शनार्थमयतां दिङ्नायकानामिव ॥ ६३ ॥

मूर्तीनामिह पृष्ठतः करिवधूपृष्ठप्रतिष्ठाजुषां
तन्मूर्तीर्विमलाश्मखत्तकयुता कान्तासमेता दश ।
चौलुक्यक्षितिपालवीरधवलस्याद्वैतबन्धुः सुधी-
स्तेजःपाल इति व्यधापयदयं श्रीवस्तुपालानुजः ॥ ६४ ॥

Digitized by Google

तेजःपालः सकलप्रजोपजीव्यस्य वस्तुपालस्य ।
सविधे विभाति सफलः सरोवरस्येव सहकारः ॥ ६५ ॥

तेन भ्रातृयुगेन या प्रतिपुरग्रामाध्वशैलस्थलं
वापीकूपनिपानकाननसरःप्रासादसत्रादिकाः ।
धर्मस्थानपरंपरा नवतरा चक्रेथ जीर्णोद्धृता
तत्संख्यापि न बुध्यते यदि परं तद्वेदिनी मेदिनी ॥ ६६ ॥

शम्भोः श्वासगतागतानि गणयेद्यः सन्मतिर्योथवा
नेत्रोन्मीलनमीलनानि कलयेन्मार्कण्डनाम्नो मुनेः ।
संख्यातुं सचिवद्वयीविरचितामेतामपेतापर-
व्यापारः सुकृतानुकीर्तनततिं सोप्युज्झितेते यदि ॥ ६७ ॥

सर्वत्र वर्ततां कीर्तिरश्वराजस्य शाश्वती ।
मु(उद्धर्तु)मुपकर्तुं च जानीते यस्य संततिः ॥ ६८ ॥

आसीच्चण्डपमण्डितान्वयगुरुर्नागेन्द्रगच्छश्रिय-
श्चूडारत्नमयत्नसिद्धमहिमा सूरिर्महेन्द्राभिधः ।
तस्माद्विस्मयनीयचारुचरितः श्रीशान्तिसूरिस्ततो-
प्यानन्दामरसूरियुग्ममुदयच्चन्द्रार्कदीप्रद्युति ॥ ६९ ॥

श्रीजैनशासनवनीनवनीरवाहः
श्रीमांस्ततोप्यघहरो हरिभद्रसूरिः ।
विद्वान्मनोमयगदेष्वनवद्यवैद्यः
ख्यातस्ततो विजयसेनमुनीश्वरोयम् ॥ ७० ॥

गुरोस्तस्याशिषां पात्रं सूरिरभ्युदयप्रभुः ।
मौक्तिकानीव सूक्तानि भान्ति यत्प्रतिभाम्बुधेः ॥ ७१ ॥

Digitized by Google

एतद्धर्मस्थानं धर्मस्थानस्य चास्य यः कर्त्ता ।
तावद्भूयमिदमुदियादुदयत्ययमर्बुदो यावत् ॥ ७२ ॥
श्रीसोमेश्वरदेवश्चुलुक्यनरदेवसेविताङ्घ्रिपद्मयुग्मः ।
रचयांचकार रुचिरां धर्मस्थानप्रशस्तिमिमाम् ॥ ७३ ॥
श्रीनेमेरम्बिकायाश्च प्रसादादर्बुदाचले ।
वस्तुपालान्वयस्यास्तु प्रशस्तिः स्वस्तिशालिनी ॥ ७४ ॥

सूत्रकारकहुणसुतधांधलपुत्रेण चण्डेश्वरेण प्रशस्तिरियमुत्कीर्णा श्रीविक्रमसंवत् १२९३ वर्षे श्रीश्रावण बदि ३ रवौ श्रीविजयसेनसूरिभिः प्रतिष्ठा कारिता ॥

Digitized by Google

TRANSLATION.

(1) I make a bow to *Sarasvatî*, the goddess of learning, who resorts to the poet's mind (*Mánasa*), as if carried to its own abode by the inhabitant of the *Mânasa* lake (flamingo) whom she rides.

(2) May *Śivâ's* son give you happiness, who, though possessed of beauty, is free from sensual desire; who, though calm (lit. quenched), is ever burning to put down passion; and who, though his eyes are shut, sees all.

(3) There is the city of *Aṇahilapura*, guarded by *Choulukya* kings who can bear comparison with kings like *Aja*, *Raji* (?) and *Raghu*; the city which affords happiness to people, and where even when the bright fortnight is over, darkness is lessened to a late hour by the faces of the fair, bright as the moon. In that town—

(4) There lived *Chaṇḍapa*, who was as it were the crown of the *Prágváta* family, whose fame was fair as the flower of *Kuṭaja*, and who surpassed in liberality the garden of wish-giving trees.

(5) In consequence of the fruition of his meritorious deeds, a son was born to him, whose name was *Chaṇḍaprasâda*, who was the gold flag-staff of the edifice of his family, whose banner, fame, was spread far and wide.

(6) From that minister of inscrutable heart, who was like the ocean of milk, there sprang *Soma* (the moon), who, by his rays, his virtues, so delighted good men as to make their hair bristle with joy.

(7) From him was born *Aśvarâja*, who bore in his heart devotion to the great *Jina*. *Kumáradevî* was his beloved wife as *Párvatî*, the mother of *Kártikeya*, of the god *Śiva*.

(8) Their first son was minister *Lûṇiga* by name, who, even when young, was carried by destiny to live in the same world as Indra.

(9) The minister *Lûṇiga*, whose refined intellect looked down even upon that of *Bṛihaspati*, was from the beginning counted among accomplished men by good judges.

(10) His son was the excellent minister *Malladeva*, who was attached to the god *Mallideva* (one of the *Jinas*). The mind of this minister who, by a perfect control over his passions acquired the highest knowledge, was never set on the wealth or wives of others.

Digitized by Google

(11) Indeed the creator did not create any one who could rival *Malladeva* in the practice of piety, in supplying people's wants, and in the re-establishment of disturbed peace.

(12) *Malladeva's* fame, which liberated rays of the moon from flakes of dark-blue clouds, throttled the white lustre of the tusks of powerful elephants.

(13) Illustriously lives the happy younger brother of this *Malladeva* who had subdued his passions, *Vastupâla* by name, who by the ambrosia of his words produces a wonderful shower of pleasure; and who effaces from the foreheads of learned men the lines of misery written by destiny.

(14) *Vastupâla*, foremost among poets and first among the ministers of *Chulukya* kings, never borrows thoughts in writing poetry, and never misappropriates money in the discharge of his ministerial duties.

(15) There shines his younger brother the great minister *Tejahpâla*, who always guards the treasury of his sword's glory, who is a terror to the wicked and whose fame spreads over every part of the world.

(16) Who can accurately delineate the nature of *Vastupâla* and *Vishṇu*, the interior of whose bosoms (literally stomachs) contains the power which regulates the three worlds?

(17) *Jâlhû*, *Mâ-û*, *Sâ-û*, *Dhanadevî* *Sohagû*, *Vayajukû*, and *Padamaladevî* are the seven sisters of these in order (of age).

(18) These sons of *Aśvarâja* are no others than the well-known four sons of *Daśaratha*, who have re-appeared in this world from a desire to dwell in one and the same womb.

(19) Whose heart does not *Vastupâla*, who is accompanied by his younger brother *Tejahpâla*, gladden as the month of *Chaitra* accompanied by that of *Vaiśâkha*?

(20) Remembering the commandment recorded in law that one should not venture on a journey alone, these two brothers set out together on the path of righteousness, which is infested by thieves in the form of irresistible temptations.

(21) May prosperity ever attend these two brothers, who looked glorious with their arms long as the yoke of a chariot, and who, being sinless, brought back to the earth the first (*kṛit* or golden) age even during this fourth (*kali* or iron) age.

Digitized by Google

(22) May these two brothers long enjoy health of body—these brothers, whose fame (bright white) spreading over the earth's entire globe makes it look as if it were made of pearl.

(23) Though sprung from the same source, these two were like two arms of the same man, yet both of them were right, and neither was the contrary* (left).

(24) These two brothers, marking the earth in all directions with places of charitable endowments, put their heel with force on the neck of the iron-age.

(25) Now, there was born in the race of *Choulukya* warriors a brilliant personage known as *Arṇorâja*, who was an ornament of his branch (of the *Chulukya* family).

(26) He was succeeded by *Lavaṇaprasâda*, whose victorious career was uninterrupted, who destroyed all his enemies, and whose fame, fair as conch-shells bleached by the waters of the Bhâgîrathi, crossed the salt ocean and travelled freely beyond it.

(27) To him was born a son, whose name was *Vîradhavala*, who was like *Daśaratha* and *Kakutstha*, and who swallowed the forces of hostile kings. The bright stream of the fame of this king, as it spread forth, defeated all the arts of clandestinely visiting their lovers, which could be employed by lewd women afflicted with a longing for sensual pleasure.

(28) Indeed the *Choulukya* king *Vîradhavala* acted wisely, and did not lend his ear to the senseless words of those who whispered in his ear the slander of the two ministers. The ministers, too, rendered his dominion brilliant with increasing prosperity, and picketed in his court-yard troops of horses and crowds of elephants.

(29) It seems that this king† (*Vîradhavala*), with only two hands, easily embraced *Lakshmî* with those two ministers at hand. (The poet's meaning seems to be that *Vîradhavala* did with two hands only what Vishṇu does with four, the two ministers who were by his side serving as two hands in addition to his own).

Besides,

(30) There is this mountain *Arbuda*, the son of the mountain *Himâlaya*, the father-in-law of *Śiva*, who stands at the head of the whole

---

* दक्षिण, वाम, and सोदर are used in a double sense.

† The word here used for 'king' is a name of god Vishṇu also.

Digitized by Google

class of mountains, and who, bearing on his head the river *Mandâkinî*, mimics *Śiva*, whose brother-in-law he is.

(31) At certain places on this mountain, amorous desire makes its way even into the heart of one who seeks heaven, when he sees beautiful damsels sporting; at other places, even a light-hearted man becomes disgusted with the world when he sees the numerous sacred places which even sages might covet.

(32) From the altar of the sacred fire which was fed by the offerings of *Vaśishṭha*, the greatest of great sages, there sprang up a wonderful man, whose great personal lustre surpassed that of the sun. This sage, who was a receptacle of Vedic lore, knowing this man to be exclusively devoted to the destruction of his foes, called him by the name *Paramâra*. Hence all his descendants too bore the name.

(33) The first in that line of kings was *Dhûmarâja*, who was like a terrestrial Indra, as he made kings to feel the pangs of having both the wings of their armies routed.*

(34) Then followed *Dhandhuka*, *Dhruvabhaṭa* and others who took in conquest, multitudes of enemies' elephants, and in whose family was born the beautiful *Râmadeva*, who surpassed the god of love.

(35) To him, the waves of whose fame filling the whole cavity of space enveloped in their whiteness the rays of the moon, succeeded his son *Yaśodhavala*, who never succumbed to the power of Cupid, and who promptly killed *Balḷâla*, the king of *Mâḷwâ*, having come to know that he had become hostile to the *Choulukya* king, *Kumârapâla*.

(36) His son was *Dhârâvarsha*, who deserved the praise of the whole world, and the edge of whose sword was sharpened by being polished on the throats of his enemies, and in consequence of whose refusal to leave the field of battle, the wives of the king of the *Konkaṇa* unceasingly shed tears from their lotus-like eyes.

(37) This prince whose power knew no obstruction was clearly *Râma*, the son of *Daśaratha*, who reappeared on the earth and who, though a great warrior, devoted himself exclusively to hunting, as if out of hatred to *Mârîcha* (who had deceived *Râma* by assuming the form of a deer).

---

* The words used to denote kings and wings of armies are such that they may mean mountains and wings as well. Thus the description of the king applies to Indra also.

Digitized by Google

(38) His younger brother *Prahlâdana*, whose valour remained unsullied on the field of battle against *Sâmantasiṁha*, and whose sword was ever prompt in defending the king of Gujerat, exhibited once more exploits such as those which were performed by the enemy of the greatest of demons (probably *Râvana*).

(39) I cannot decide whether it was the daughter of *Brahman* (*Sarasvatî*) or the divine cow yielding all desired objects, that came to the earth in the form of this king *Prahlâdana*.

(40) Great is the son of *Dhârâvarsha*, *Somasiṁhadeva*, who inherited bravery from his father, learning from his uncle, and wisdom from both.

(41) Having won numerous pearls and shawls from his many enemies, the king *Somasiṁha* obtained fame which was bright like the moon, but which was peculiar in this respect, that, though it brightened the whole surface of the earth, it did not dispel the darkness on the faces of his enemies rendered uneasy by jealousy.

(42) His son *Krishnarâjadeva* is ever glorious like *Krishṇa*, the son of *Vasudeva*, the * former possessed fame and mercy as the latter was accompanied by his mother Yaśodâ, but was a degree greater than he in valour.

And here at the same time:

(43) There is no one anywhere within the range of my sight, who is like Vastupâla in lineage, in modesty, in learning, in heroic acts and in works of righteousness.

(44) To this great minister his beloved wife *Lalitâdevî* bore a son by name *Jayantasiṁha*, who never departed from justice; as *Sâchi*, the daughter of *Puloma*, bore *Jayanta* to *Indra*.

(45) Who is there whose heart does not feel pleasure when he thinks of *Jayantasiṁha*, who is ever on the alert to defeat the God of Love, and who even at a time of life, which is hostile to modesty and destitute of wisdom, possesses justice, politeness and growing virtues.

(46) May this *Jayantasiṁha*, the son of *Vastupâla*, live a thousand revolutions of the four ages, whose personal beauty excels that of the God of Love, and whose charity surpasses the desire (of the suitor).†

---

* The double sense of *Yaśodalyâ Saṁsrita* is easy to understand.

† 'God of Love' and 'desire' are expressed in the original by the same word, काम.

Digitized by Google

(47) May the glorious minister *Tejahpâla* live for ever, by means of whom all people rejoice, being freed from all cares as if by means of the wish-giving gem.

(48) Indeed the God *Brahman* was practising (trying his apprentice hand) in order to create ultimately this minister, when he created beforehand wise politicians such as *Châṇakya*, *Bṛihaspati*, *Marut* (?) *Vyadhi*-(?) *Sùkra* and others; otherwise, how did this *Tejahpâla* become better than all of them?

(49) There is the brother of *Vastupâla*, the minister *Tejahpâla*—a source of happiness to all living beings, and the preserver of the order established by Bali on this earth; seeing whom, full of wisdom, *Kâmandaki* ceases to think highly of his own qualifications and *Châṇakya* is struck with wonder in his heart.

Now follows the description of the paternal ancestors of *Anupamadevi* the wife of the great *Tejahpâla*.

(50) There was born a wise man, whose name was *Gâgâ*, who was the best crest-jewel that graced the family of *Prâgvâta* (*Porvâḷ Vaṇia*) who lived in the city of *Chandrâvatî*, which abounded in riches, and who laved the surface of the earth in the waves of his fame. Who did not nod his head, and whose hair did not stand on end for joy on account of the admiration of his conduct?

(51) His son was *Dharaṇiga* by name, who followed the path of the good, and who being* *full of accomplishments* was ever *present in the heart* of his Lord as a garland *woven upon a string on the chest.*

(52) His wife was *Tribhuvanadevî*, who bore a virtuous character well-known throughout the three worlds. Her body was different from that of her husband, but her mind was the same as his.

(53) Her daughter *Anupamadevî*, who by her character, equalled the Goddess *Pârvatî* herself, was married to the great *Tejahpâla*.

(54) This *Anupamadevî*, the wife of the great minister *Tejahpâla*, was a creeper that bore the splendid blossom of good character. The moon of her numerous virtues, such as justice, modesty, discrimination, kindness, charity, shed lustre on the whole family.

(55) *Lâvaṇyasiṁha* is their son, who overcomes the force of sensual desires which are like vicious horses, and who, though he has attained an age, the most propitious for love, follows a path in which piety alone is exercised.

---

* गुणि and हृद्यवस्थिति are used in a double sense.

Digitized by Google

(56) How many are there who do not praise the excellences of this blessed man, *Lûṇasiṁha*, the son of *Tejahpâla*, which (excellences), though bound hard by the ropes of wealth, made mischief—fame—all about the three worlds. (The meaning is that a man not in need of wealth does not go about to show off his excellences, yet those of this man were known throughout the world).

(57) (A vessel containing treasure, hidden under ground is guarded by snakes, and is such that it decreases when men live upon its contents ; but) This minister is a vessel containing a treasure of virtues which is open to the sight. This treasure is not attended by snakes in the form of wicked companions. It is a treasure which increases though good men live by it.

(58) The son of the minister *Malladeva*, by *Lîluká*, is *Pûrṇasiṁha* by name. His son, *Pethaḍa*, the home of all good acts, lives in happiness.

(59) *Anupamâ* was the wife of the minister *Tejahpâla;* and this long-lived youth, whose name is *Lâvaṇyasiṁha*, is the son of the two.

(60) That minister has built on the mountain *Arbuda* (Mount Aboo) this temple of *Nenimâtha* for the spiritual good of his wife and son.

(61) *Tejahpâla*, the minister of the great king, caused to be built of stone as bright as Śaṅkha shells, a temple for *Neminâtha*, beautiful as the shining moon or *kunda* flowers—a lofty hall in the front—fifty-two rooms for *Tirthankaras* on the sides, and further on a *Balânaka* (?)

(62) From the great *Chaṇḍâpa* was born *Chaṇḍaprasâda*, from him *Soma*, from him *Aśvarâja;* his sons were the great *Luṇiga* and minister *Malladeva*, and he named *Vastupâla* and *Tejahpâla*, who were like rain-clouds, hovering over the garden of Jainism.

(63) The great *Jaitrsiṁha*, the son of the great minister *Vastupâla;* he far-famed for intelligence, called *Lâvaṇyasiṁha*, the son of *Tejahpâla:* there stand for ever the ten statues of these (mentioned above), mounted on the shoulders of female elephants, like those of the presiding gods of the ten quarters, come down to visit *Jina*.

(64) Behind these statues, mounted on the backs of female elephants, were placed their ten likenesses along with those of their wives in bright marble,* by the younger brother of the great *Vastupâla, Tejahpâla* the wise, the most sincere friend of the *Choulukya* king *Vîradhavala*.

(65) By the side of *Vastupâla*, the supporter of all, shines his brother *Tejahpâla*, as a mango tree by the side of a lake.

* विमलाश्मखत्तकयुताः I do not understand the meaning of खत्तक. It may be an adaptation of तख्त. If so, the adjective may mean with thrones of white marble.

Digitized by Google

(66) The series of charitable constructions, such as wells with steps, drawing wells, ponds, gardens, tanks, temples, places for the distribution of corn and food to the needy, newly constructed, or repaired by these two brothers at every city, by every road, and on every mountain are so numerous that even their number cannot be ascertained. If anybody can, the earth may know them all.

(67) The clever man who can count the exhalations and inhalations of the God *Śiva*, and who can count the openings and shuttings of the sage *Mârkaṇḍa's* eyes, may possibly aspire, if he gives up all other occupations, to enumerate the series of praiseworthy deeds done by these two ministers.

(68) May the fame of *Aśvarâja*, whose sons knew how to repair (old works of public utility) and how to oblige, everlastingly spread in all directions.

(69) There was a sage named *Mahendra*, who without any effort became possessed of extraordinary powers, who was the crest-jewel of the glory of the *Nágendra* clan, and who was the preceptor of the family adorned by *Chaṇḍapa*. He was succeeded by *Śânti Sûri*, whose excellent life was worthy of admiration. He was followed by the pair *Ânandasuri* and *Amarasûri*, whose lustre was brilliant like that of the sun and the moon.

(70) Then followed *Haribhadrasûri*, the destroyer of sin, who was like a fresh cloud to the garden of the great Jain religion. He was succeeded by this great and celebrated sage, *Vijayasena*, who is a learned and blameless doctor of all mental diseases.

(71) The sage *Abhyudayasûri* is the object of the blessings of that preceptor. From the sea of his genius spring forth the pearls of good words (poetry).

(72) May this holy edifice as well as he who erected it flourish as long as there stands this mountain *Arbuda* (*Aboo*).

(73) *Someśvaradeva*, whose pair of feet is worshipped by the *Chulukya* king, composed this beautiful panegyric of this holy place.

(74) By the blessing of the God *Nemi* and Goddess *Ambikâ*, may this panegyric (standing) on the mountain *Arbuda* give happiness to *Vastupâla* and his descendants.

This panegyric was engraved by *Chaṇḍeśvara*, the son of *Dhândhala*, who was the son of the artisan *Kalhaṇa*. The ceremony of installation was caused to be performed by *Vijayasenasûri* on Sunday, the third of the dark fortnight of *Śravaṇa* in the year 1287 of the *Vikrama* era.

Digitized by Google

APPENDIX B.

Copy of an inscription on a tablet fixed in a wall in the right side of the Peristyle of the temple of *Tejpála*.

१ द्ण ॥ ॐ नमः × × × × × × × × × × × × × × × × वत् १२८७ वर्षे लौकिक फाल्गुन वदि ३ रवौ । अद्येह श्रीमद्णहिलपाटके चौलुक्यकुलकमलराजहंससमस्तराजावलीसमलंकृतमहाराजाधिराजश्री भ × × × × ×

२ विजयिराज्ये त × × × × × × × × × × × × (धा?) श्रीवशिष्ठकुण्डयजनानलोद्भूत श्रीमद्भूमराजदेवकुलोत्पन्नमहामण्डलेश्वरराजकुलश्रीसोमसिंहदेवविजयिराज्ये तस्यैव महाराजाधिराजश्री भीमदेवस्य प्रसाद × × × ×

३ रात्रामण्डले श्रीचौलुक्यकुलोत्पन्नमहामण्डलेश्वरराणकश्री लवणप्रसाददेवसुतमहामण्डलेश्वरराणकश्रीवीरधवलदेवसक्कसमस्तमुद्राव्यापारिणा श्रीमद्णहिलपुरवास्तव्यश्रीप्राग्वाटज्ञातीय ठ० श्रीचण्डपसुत ठ० श्री

४ चण्डप्रसादात्मजमहं० श्रीसोमतनुज ठ० श्रीआसराजभार्याठक्कुर श्रीकुमारदेव्योः पुत्रमहं० श्रीमल्लदेवसंघपतिमहं० श्रीवस्तुपालयोरनुजसहोदरभ्रातृमहं० श्रीतेजःपालेन स्वकीयभार्यामहं० श्रीअनुपमादेव्यास्तत्कुक्षिस × × ×

५ वित्रपुत्रमहं० श्रीलुणसिंहस्य च पुण्ययशोभिवृद्धये श्रीमदर्बुदाचलोपरि देउलवाडाग्रामे समस्तदेवकुलिकालंकृतं विशालहस्तिशालोपशोभितं श्रीलुणसिंहवसहिकाभिधानश्रीनेमिनाथदेवचैत्यमिदं कारितम् ॥ छ.

Digitized by Google

६ प्रतिष्टितं श्रीनागेन्द्रगच्छे श्रीमहेन्द्रसूरिसंताने श्रीशान्तिसू-
रिशिष्य श्रीआनन्दसूरि श्रीअमरचन्द्रसूरिपट्टालंकरणप्रभु श्रीहरि-
भद्रसूरिशिष्यैः श्रीविजयसेनसूरिभिः ॥ छ ॥ अत्र च धर्मस्थाने
कृतश्रावकगोष्ठिकानां नामा

७ नि यथा ॥ महं० श्रीमल्लदेवमहं० श्रीवस्तुपालमहं० श्रीतेजः-
पालप्रभृतिभ्रातृत्रयसंतानपरंपरया तथामहं० श्रीलूणसिंहसकमातृकुल-
पक्षे श्रीचन्द्रावतीवास्तव्यप्राग्वाटज्ञातीयठ० श्रीसावदेवसुतठ० श्री
शालिगतनुजठ०

८ श्रीसागरतनयठ० श्रीगागापुत्रठ० श्रीधरणिगभ्रातृमहं० श्री
राणिगमहं० श्रीलीला० तथा ठ० श्रीधरणिगभार्याठ० श्रीतिहुणदेवीकु-
क्षिसंभूतमहं० श्रीअनुपमादेवीसहोदरभातृठ० श्रीखीम्वसीह ठ० श्री-
आम्वसीह श्रीऊदल

९ तथा महं० श्रीलीलासुतमहं० श्रीलूणसीह तथा भातृठ० श्रीजग-
सीहठ० रत्नसिंहानां समस्तकुटुम्बेन एतदीयसंतानपरंपरया च एत-
स्मिन्धर्मस्थाने सकलमपिस्नपनपूजासारादिकं सदैव करणीयं निर्वा-
हणीयं च ॥ तथा ॥

१० श्रीचन्द्रावत्याः सकसमस्तमहाजनसकलजिनचैत्यगोष्टि-
कप्रभृतिश्रावकसमुदायः ॥ तथा उंवरणीकी सरउलीग्रामीयप्राग्वाट-
ज्ञा० श्रे० रासल उ० आसधर तथा ज्ञा० माणिभद्र उ० श्रे० आल्हण
तथा० ज्ञा० श्रे० देल्हण उ० खीम्वसी-

११ हधर्कटज्ञातीयश्रे० नेहा उ० साल्हा तथा ज्ञा० धउलिग उ०
आसचंद्र तथा ज्ञा श्रे० वहुदेव उ० सोम प्राग्वाट ज्ञा० श्रे० सावडउ०
श्रीपाल तथा ज्ञा० श्रे० जीन्दा उ० पाल्हण धर्कट ज्ञा० श्रे० पासु उ०
सादा प्राग्वाटज्ञातीयपूना उ० सा-

Digitized by Google

१२ ल्हा तथा श्रीमालज्ञा० पूना उ० साल्हाप्रभृतिगोष्ठिकाः ॥ अमीभिः श्रीनेमिनाथदेवप्रतिष्ठावर्षग्रन्थियात्राष्टाहिकायां देवकीय-चैत्रवदि ३ तृतीयादिने स्नपनपूजाद्युत्सवः कार्यः ॥ तथा कासन्हद-ग्रामीय ऊएसवालज्ञा-

१३ तीयश्रेष्ठसोहि उ० पाल्हण तथा ज्ञा० श्रे० सलखण उ० वाल-ण प्राग्वाट ज्ञा० श्रे० सांनुय उ० देल्हय तथा ज्ञा० श्रे० गोसल उ० आल्हा तथा ज्ञा० श्रे० कोला ऊ० आम्बा तथा ज्ञा० श्रे० पासच-न्द्र उ० पूनचन्द्र तथा ज्ञा० श्रे० जसवीर उ० ज-

१४ गा तथा ज्ञा० ब्रह्मदेव उ० राल्हा श्रीमाल ज्ञातीय कडु-यरा उ० कुलधरप्रभृतिगोष्ठिकाः । अमीभिस्तथा ४ दिने श्रीनेमि-नाथदेवस्य द्वितीयाष्टाहिकामहोत्सवः कार्यः ॥ तथा ब्रह्माणवास्तव्य प्राग्वाटज्ञातीयमहाजनि०

१५ आंमिग उ० पुनड ऊ एसलज्ञा० महा० धान्वा उ० सागर तथा ज्ञा० महा० साटा उ० वरदेव प्राग्वाटज्ञातीय महा० पाल्हण उ० उदयपाल ऊंइसवाल ज्ञा० महा आबोधन उ० जगसीह श्रीमाल ज्ञा० महा० वीसल उ० पासदेवप्रा—

१६ ग्वाटज्ञातीयमहा० वीरदेव उ० अरसीह तथा ज्ञा० श्रे० धनचन्द्र उ० रामचन्द्र प्रभृतिगोष्ठिकाः । अमीभिस्तथा ५ पञ्चमीदिने श्रीनेमिनाथदेवस्य तृतीयाष्टाहिकामहोत्सवः कार्यः ॥ तथा धउली-ग्रामीय प्राग्वाटज्ञातीयश्रे० सा—

१७ जण उ० पासवीर तथा ज्ञा० श्रे० वोहडिउ० पुना तथा ज्ञा० श्रे० जसडय उ० जेगण तथा ज्ञातीय श्रे० साजण उ० भोला तथा ज्ञा० पासिल उ० पूनुय तथा ज्ञा० श्रे० राजुय० ऊ सावदेव तथा ज्ञा० दूगसरण उ० साहणीय ऊंइसवाल.

Digitized by Google

१८ ज्ञा० श्रे० सलखणऊँ महं० जोगा तथा ज्ञा० श्री देवकुंयार उ० प्रभृतिगोष्टिकाः ॥ अमीभिस्तथा ६ षष्टीदिने श्रीनेमिनाथदेवस्य चतुर्थाष्टाहिकामहोत्सवः कार्यः ॥ तथा मुण्डस्थलमहातीर्थवास्तव्यप्राग्वाटज्ञातीय

१९ श्रेष्ठ संधीरण उ० गुणचन्द्रपाल्हा तथा श्रे० सोहिय उ० आस्वेसर तथा श्रे० जेजा उ० खांखण तथा फीलिणिग्रामवास्तव्य श्रीमाल ज्ञा० वापलगाजणप्रमुखगोष्ठिकाः । अमीभिस्तथा ७ सप्तमीदिने श्रीनेमिनाथदेवस्य पञ्चमाष्टाहिकाम

२० होत्सवः कार्यः ॥ तथा हण्डाउद्राग्रामडबाणीग्रामवास्तव्य श्रीमालज्ञातीय श्रे० आस्वुय उ० जसराज तथा ज्ञा० श्रे लखमण उ० आसू तथा ज्ञा० श्रे० आसल उ० जगदेव तथा ज्ञा० श्रे० समिग उ० धणदेव तथा ज्ञा० श्रे० जिणदेव उ० जाला

२१ प्राग्वाट ज्ञा० श्रे० आसल उ० सादा श्रीमाल ज्ञा० श्रे० देदा उ० वीसल तथा ज्ञा० श्रे० आसधर उ० आसल तथा ज्ञा० श्रे० थिरदेव उ० वीरुय तथा ज्ञा० श्रे० गुणचन्द्र उ० देवधर तथा ज्ञा० श्रे० हरिया उ० हेमा प्राग्वाट ज्ञा० श्रे० लखमण

२२ उ० कडुयाप्रभृतिगोष्ठिकाः । अमीभिस्तथा ८ अष्टमीदिने श्रीनेमिनाथदेवस्य षष्ठाष्टाहिकामहोत्सवः कार्यः ॥ तथा मडाहडवास्तव्य प्राग्वाटज्ञातीय श्रे० देसल उ० ब्रह्मसर (सा?)ण तथा ज्ञा० जसकर उ० श्रे० धणिया तथा ज्ञाश्रे०

२३ देल्हण उ० आल्हा तथा ज्ञा० श्रे० वाला उ० पद्मसीह तथा ज्ञा० श्रे० आंवुय उ० वोहडि तथा ज्ञा० श्रे० वोसरि उ० पूनदेव तथा ज्ञा० श्रे० वीरुय उ० साजण तथा ज्ञा० श्रे० पाहुय उ० जिणदेवप्रभृतिगोष्ठिकाः । अमीभिस्तथा ९ नवमीदिने

Digitized by Google

२४ श्रीनेमिनाथदेवस्य सप्तमाष्टाहिकामहोत्सवःकार्यः ॥ तथा साहिलवाडावास्तव्य ऊइसवालज्ञातीयभेदेल्हण उ० आल्हण भे० नागदेव उ० आस्वदेव भे० काल्हण उ० आसल भे० वोहिथ उ० लाखण भे० जसदेव उ० वहडा भे०

२५ सीलण उ० देल्हण भे० वहुदा भे० महधरा उ० धनपाल भे० पूनिग उ० वाघा भे० गोसल उ० वहडाप्रभृतिगोष्टिकाः । अमीभिस्तथा दशमीदिने श्रीनेमिनाथदेवस्य अष्टमाष्टाहिकामहोत्सवः कार्यः ॥ तथा श्रीअर्बुदोपरिदेउलवा

२६ डावास्तव्य समस्तश्रावकैः श्रीनेमिनाथदेवस्य पञ्चापि कल्याणिकानि यथादिनं प्रतिवर्षं कर्तव्यानि ॥ एवमियं व्यवस्था श्रीचन्द्रावतीपतिराजकुलश्रीसोमसिंहदेवेन तथा तत्पुत्र राज० श्रीकान्हडदेवप्रमुखकुमारैः समस्तराजलोकैस्तथा श्रीचन्द्रावतीयस्थानपतिभट्टारकप्रभृतिकविलास तथा गूगुलीब्राह्मणसमस्तमहाजनगोष्ठिकैश्च तथा अर्बुदाचलोपरि श्रीअचलेश्वर श्रीवशिष्ठ तथा संनिहिता ग्राम देउलवाडाग्राम श्रीश्रीमातामहबुग्राम आवुयाग्राम ऊरासाग्राम ऊ-

२८ तरडग्राम सिहरग्राम सालग्राम हेठउजीग्राम आखीग्राम श्रीधान्धलेश्वरदेवीय कोटडी प्रभृति द्वादश ग्रामेषु संतिष्ठमान स्थानपति तपोधन गूगुलि ब्राह्मण राठिय प्रभृति समस्तलोकैस्तथा भालिभाडाप्रभृति ग्रामेषु संतिष्ठमानश्रीप्रतीहा

२९ रवंशीय सर्वराजपुत्रैश्च आत्मीयात्मीयस्वेच्छया श्रीनेमिनाथदेवस्य मण्डपे समुपविश्योपविश्य महं० श्रीतेजःपालपार्श्वात्स्वीयस्वीय प्रमोदपूर्वकं श्रीलुणसीहवसहिकाभिधानस्यास्य धर्मस्थानस्य सर्वोपि रक्षापभारः स्वीकृतः । तदेतदा

Digitized by Google

३० त्मीयवचनं प्रमाणीकुर्वद्भिरेतैः सर्वैरपि तथा एतदीय-संतानपरंपरया च धर्मस्थानमिदमाचन्द्रार्कं यावत्परिरक्षणीयम्॥ यतः। किमिह कपालकमण्डलुवल्कलसितरक्तपटजटापटलैः । व्रतमिद-मुज्ज्वलमुन्नतमनसां प्रतिपन्ननिर्वहणम् ॥

३१ तथा महाराजकुल श्रीसोमसिंहदेवेन अस्यां श्रीलूणसिंह-वसहिकायां श्रीनेमिनाथदेवाय पूजाङ्गभोगार्थं वाहिरहद्यां डवाणि-ग्रामः शासनेन प्रदत्तः ॥ स च श्रीसोमसिंहदेवाभ्यर्थनया प्रमारा-न्वयिभिराचन्द्रार्कं यावत्प्रतिपाल्यः ॥

३२ सिद्धिक्षेत्रमिति प्रसिद्धमहिमा श्रीपुण्डरीको गिरिः श्रीमान्रै-वतकोपि विश्वविदितः क्षेत्रं विमुक्तेरिति । नूनं क्षेत्रमिदं द्वयोरपि तयोः श्रीअर्बुदस्तत्प्रभू भेजाते कथमन्यथा सममिदं श्रीआदिनेमी स्वयम् १ ॥ संसारसर्वस्वमिहैव मुक्ति(:?)

३३ सर्वस्वमप्यत्र जिनेशदृष्टम् । विलोक्यमाने भुवने तवास्मि-न्पूर्वं परं च त्वयि दृष्टिपान्थे ॥ २ श्रीकृष्णर्षायश्रीनयचन्द्रसूरेरिमे । संसरवणपुत्र संसिंहराजसाधूसाजणसं सहसा साइदेपुत्री सुनथव प्रणमन्ति ॥ शुभम् ॥

Note.—Lines 32 and 33 which are partly unintelligible are not so carefully inscribed as the rest of the inscription. The letters are badly shaped, and there occur in these lines five instances in which the single mâtrâ is written on the top of the letter to which it belongs.

Digitized by Google

APPENDIX C.

An extract containing a brief statement of the doctrine of Syâdvâda.

सर्वं वस्तु सप्तभङ्गस्वभावं भजते । ते सप्तभङ्गाश्चामी

१ स्वद्रव्यक्षेत्रकालभावापेक्षया——स्यादस्ति ।

२ परद्रव्यक्षेत्रकालभावापेक्षया——स्यान्नास्ति ।

३ कस्यचिदंशस्य स्वद्रव्याद्यपेक्षया विवक्षितत्वात्कस्यचिच्चांशस्य परद्रव्याद्यपेक्षया विवक्षितत्वाच्च } स्यादस्तिनास्ति ।

४ वचनस्य क्रमगोचरत्वादनयोरेव धर्मयोर्यौगपद्येनाभिधातुमशक्यत्वात् } स्यादवक्तव्यम् ।

५ एकस्यांशस्य स्वद्रव्याद्यपेक्षया परस्य तु सामस्त्येन स्वपरद्रव्याद्यपेक्षया विवक्षितत्वात् } स्यादस्त्यवक्तव्यम् ।

६ एकस्यांशस्य परद्रव्याद्यपेक्षया परस्य तु यौगपद्येन स्वपरद्रव्याद्यपेक्षया विवक्षितत्वात् } स्यान्नास्त्यवक्तव्यम् ।

७ एकस्यांशस्य स्वद्रव्याद्यपेक्षया परस्य तु परद्रव्याद्यपेक्षया अन्यांशस्य तु स्वपरद्रव्याद्यपेक्षया विवक्षितत्वात् } स्यादस्ति च नास्ति चावक्तव्यं च ।

Digitized by Google

(1). Everything is, when viewed with reference to its own material, time, place, and qualities.

(2). Everything is non-existent when viewed with reference to material, time, place, and qualities not its own, but those of others.

(3). Everything is, and is non-existent, when viewed alternately in the above two relations.

(4). Everything is beyond the sphere of speech when viewed in both the relations at the same time.

(5), (6), & (7). Seem to be arrived at by combining the first three views, each at a time with the last.

Digitized by Google

ERRATA.

KÎRTIKAUMUDÎ.

P. 1, l. 11. For °पास्ति समु°. read °पास्तिसमु°.
P. 2, l. 21. „ दुःखार्तो „ दुःखार्ता.
P. 13, l. 22. „ °पाली ज° „ °पालोज°.
P. 19, l. 3. „ वीर धवलेन „ वीरधवलेन.
P. 19, l. 7. „ तत्र भवती „ तत्रभवती.
P. 40, l. 20. „ दूर्वाभा° „ दूर्वाभ°.
P. 42, l. 14. „ वाचि वाचि ग° „ वाचि चाचिग.
P. 43, l. 19. „ °सिंहः „ सिंहं.
P. 45, l. 19. „ पुण्डे „ पुण्ड्रे°.
P. 47, l. 14. „ पुरो „ पुरा.
P. 48, l. 10. „ समग्रे „ समग्रो.
P. 49, l. 1. „ लीलामरन्द „ लीला मरन्द.
P. 49, l. 16. „ सङ्कृत्तं „ स ङ्कृतं.
P. 49, l. 21. „ धन „ धन.
P. 53, l. 9. After the first सान्द्रे supply in brackets चान्द्रे.
P. 54, l. 13. „ नखान्तं „ नखान्तः
P. 55, l. 6. For लेखाख° read लेखा ख.
P. 56, l. 1. „ विलंघ्य „ विलङ्घ्य.
P. 56, l. 12. „ तशमदेन „ तदा मदेन.
P. 57, l. 11. „ श्रमः स्त्रि° „ श्रमस्त्रि°.
P. 57, l. 16. „ °रमाकम° „ °रमा कम°.
P. 63, l. 20. „ चिराय वैरा „ चिरायवैरा.
P. 64, l. 6. „ शिलिन्ध्रै° „ शिलीन्ध्रै°.
P. 67, l. 14. „ नान्तः करणं „ नान्तःकरणं.

Digitized by Google

ERRATA.

NOTES.

P. 1, l. 25. Read 'well known Śiva,' as in inverted commas.
P. 2, l. 23. For numerates read 'enumerates.'
P. 3, l. 5. Supply a semi-colon after 'feminine.'
P. 7, l. 19. For 'Arnorâja' read 'Ajayapâla.'
P. 7, l. 27. „ 'Aśura' „ 'Asura.'
P. 9, l. 9. „ 'Soreṭh' „ 'Bundelkhund.'
P. 12, l. 10. „ समानै: supply a comma.
P. 12, l. 27. After चाणक्य „ 'for contrast.'
P. 14, l. 9. Read 'temples and' after 'repairing.'
..... For 'and thus, &c.,' read 'Inscriptions lately discovered by Professor Bhandarkar and Mr. K. T. Telang prove, that the word कीर्तन was used in the sense of a temple.
P. 15, l. 6. For 'arbitrator' read 'mediator.'
P. 19, l. 2. „ 'battle' „ 'battle-field.'
P. 20, l. 14. After 'same' „ 'time.'
P. 24, l. 8. „ 'those' „ 'two.'
P. 26, l. 12. For 'is' „ 'was.'
P. 27, l. 14. After 'sides' supply a comma.
P. 29, l. 19. „ 'as' read 'a.'

Digitized by Google

Digitized by Google

Digitized by Google

Digitized by Google

YC 54572

458432

UNIVERSITY OF CALIFORNIA LIBRARY

Digitized by Google